# Shrikrishnakarnamrita Namavalih

# श्रीकृष्णकर्णामृत नामावलिः

## Document Information

Text title : Namavali constructed from Shrikrishna Karnamritam

File name : shrIkRRiShNakarNAmRRitAdhiShThitAnAmAvaliH.itx

Category : vishhnu, nAmAvalI, vishnu, krishna

Location : doc_vishhnu

Author : Kavi Bilvamangala (Lilasuka). Namavali constructed by Narendran Madathil madathilnarendran at gmail.com

Transliterated by : Narendran Madathil madathilnarendran at gmail.com

Proofread by : Narendran Madathil

Translated by : Narendran Madathil

Latest update : September 27, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 5, 2025

*sanskritdocuments.org*

# श्रीकृष्णकर्णामृत नामावलिः

(अवलम्बः - लीलाशुककविना बिल्वमङ्गलस्वामिना विरचितं श्रीकृष्णकर्णामृतम्)
हरिः श्री गणपतये नमः अविघ्नमस्तु ।
नमः शिवायै च नमः शिवाय ।
ॐ नमो नारायणाय ।
ॐ सरस्वत्यै नमः ।
ॐ श्री गुरुभ्यो नमः ।
श्रिकृष्णाय परब्रह्मणे नमः ।
नमोऽस्तुते महायोगिन् प्रपन्नमनुशाधि माम् ।
यथा त्वत् चरणाम्भोजे रतिस्यादनपायिनी ॥

क्रमसङ्ख्या नाम (श्लोकः)

## प्रथमसर्गः

१. ॐ भगवते नमः । (१.१)
२. ॐ शिखिपिञ्छमौलिने भगवते नमः । (१.१)
३. ॐ शिक्षागुरवे नमः । (१.१)
४. ॐ यत्पादकल्पतरुपल्लवशेखरेषु जयश्रीः लीलास्वयंवररसं लभते तस्मै नमः । (१.१)
५. ॐ स्वस्तरुणीकराग्रविगलत्कल्पप्रसूनाप्लुताय नमः । (१.२)
६. ॐ वेणुनादलहरीनिर्वाणनिर्व्याकुलाय नमः । (१.२)
७. ॐ स्रस्तस्रस्तनिरुद्धनीविविलसद्गोपीसहस्रावृताय नमः । (१.२)
८. ॐ हस्तन्यस्तनतापवर्गाय नमः । (१.२)
९. ॐ अखिलोदाराय किशोराकृतये नमः । (१.२)
१०. ॐ चातुर्यैकनिधानसीमचपलाङ्गच्छटामन्थराय नमः । (१.३)
११. ॐ लावण्यामृतवीचिलालितदृशे नमः । (१.३)
१२. ॐ लक्ष्मीकटाक्षामृताय नमः । (१.३)

१३. ॐ कालिन्दीपुलिनाङ्कणप्रणयिने नमः । (१.३)
१४. ॐ कामावताराङ्कुराय नमः । (१.३)
१५. ॐ मधुरिमस्वाराज्यदायकाय नमः । (१.३)
१६. ॐ नीलबालाय नमः । (१.३)
१७. ॐ चेतसि चकासते ज्योतिषे नमः । (१.४)
१८. ॐ बर्होत्तंसविलासिकुन्तलभराय नमः । (१.४)
१९. ॐ माधुर्यमग्नाननाय नमः । (१.४)
२०. ॐ प्रोन्मीलन्नवयौवनाय नमः । (१.४)
२१. ॐ प्रविलसद्वेणुप्रणादामृताय नमः । (१.४)
२२. ॐ आपीनस्तनकुड्मलाभिः गोपीभिः अभितः आराधिताय नमः । (१.४)
२३. ॐ जगतां एकाभिरामाद्भुत ज्योतिषे नमः । (१.४)
२४. ॐ मधुरस्मितामृतविमुग्धमुखाम्बुरुहाय नमः । (१.५)
२५. ॐ मदशिखिपिञ्छलाञ्छितमनोज्ञकचप्रचयाय नमः । (१.५)
२६. ॐ विपुलविलोचनाय नमः । (१.५)
२७. ॐ “विषयविषामिषग्रसनगृध्नुनि चेतसि चिरं चकास्तु” इति प्रार्थ्यमानाय नमः । (१.५)
२८. ॐ मुकुलायमाननयनाम्बुजाय नमः । (१.६)
२९. ॐ मुरलीनिनादमकरन्दनिर्भराय नमः । (१.६)
३०. ॐ मुकुरायमानमृदुगण्डमण्डलाय नमः । (१.६)
३१. ॐ “विभो! मुखपङ्कजं मनसि विजृम्भतां” इति प्रार्थ्यमानाय नमः । (१.६)
३२. ॐ कमनीयकिशोरमुग्धमूर्तये नमः । (१.७)
३३. ॐ कलवेणुक्वणिताद्दतानेनेन्दवे नमः । (१.७)
३४. ॐ मुरारये नमः । (१.७)
३५. ॐ “मधुरिम्णः कापि कापि कणिकापि वाचि विजृम्भतां” इति प्रार्थ्यमानाय नमः । (१.७)
३६. ॐ मदशिखण्डिशिखण्डविभूषणाय नमः । (१.८)
३७. ॐ मदनमन्थरमुग्धमुखाम्बुजाय नमः । (१.८)
३८. ॐ व्रजवधूनयनाञ्चलवञ्चिताय नमः । (१.८)
३९. ॐ “वाङ्मयजीवितं विजयतां” इति प्रार्थ्यमानाय नमः । (१.८)
४०. ॐ पल्लवारुणपाणिपङ्कजसङ्गिवेणुरवाकुलयुताय नमः । (१.९)
४१. ॐ फुल्लपाटलपाटलीपरिवादिपादसरोरुहाय नमः । (१.९)
४२. ॐ उल्लसन्मधुराधरद्युतिमञ्जरीसरसाननाय नमः । (१.९)
४३. ॐ वल्लवीकुचकुम्भकुङ्कुमपङ्किलाय नमः । (१.९)
४४. ॐ आश्रितप्रभवे नमः । (१.९)

४५. ॐ अनङ्गलीलारसरञ्जिताभिः वल्लवसुन्दरीभिः अनुक्षणं अपाङ्गरेखाभिः अभ्यर्च्यमानाय नमः । (१.१०)
४६. ॐ आश्रितविभवे नमः । (१.१०)
४७. ॐ हृद्यविभ्रमाणां व्रजबालसुन्दरीणां हृदयाय नमः । (१.११)
४८. ॐ हर्षविशाललोलनेत्राय नमः । (१.११)
४९. ॐ हृदये सन्निधाय तरुणाय तरलं किञ्चन धाम्ने नमः । (१.११)
५०. ॐ निखिलभुवनलक्ष्मीनित्यलीलास्पदाभ्यां पादाम्बुजाभ्यां नमः । (१.१२)
५१. ॐ कमलविपिनवीथीगर्वसर्वङ्कषाभ्यां पादाम्बुजाभ्यां नमः । (१.१२)
५२. ॐ प्रणमदभयदानप्रौढि गाढोद्धताभ्यां पादाम्बुजाभ्यां नमः । (१.१२)
५३. ॐ “कृष्णपदाम्बुजाभ्यां चेतः किमपि वहतु” इति प्रार्थ्यमानाय नमः । (१.१२)
५४. ॐ प्रणयपरिणताभ्यां लोचनाभ्यां नमः । (१.१३)
५५. ॐ प्राभवालम्बनाभ्यां लोचनाभ्यां नमः । (१.१३)
५६. ॐ प्रतिपदललिताभ्यां लोचनाभ्यां नमः । (१.१३)
५७. ॐ प्रत्यहं नूतनाभ्यां लोचनाभ्यां नमः । (१.१३)
५८. ॐ प्रतिमुहुरधिकाभ्यां प्रस्नुवल्लोचनाभ्यां नमः । (१.१३)
५९. ॐ “प्राणनाथः किशोरः हृदये प्रभवतु” इति प्रार्थ्यमानाय नमः । (१.१३)
६०. ॐ माधुर्यवारिधिमदान्धतरङ्गभङ्गीशृङ्गारसङ्कलितशीतकिशोरवेषाय नमः । (१.१४)
६१. ॐ आमन्दहासललिताननचन्द्रबिम्बाय नमः । (१.१४)
६२. ॐ “आनन्दसम्प्लवमनु मनः प्लवतां” इति प्रार्थ्यमानाय नमः । (१.१४)
६३. ॐ अव्याजमञ्जुलमुखाम्बुजमुग्धभावैः आस्वाद्यमाननिजवेणुविनोदनादाय नमः । (१.१५)
६४. ॐ भुवनार्द्राय ओजसे नमः । (१.१५)
६५. ॐ “आर्द्रे हृदये आक्रीडमानाय अरुणपादसरोरुहाभ्यां नमः । (१.१५)
६६. ॐ व्रजवीथिषु यदीयानि ललितानि लक्ष्मानि भवन्ति तत् मणिनूपुरवाचालचरणाय नमः । (१.१६)
६७. ॐ चेतसि स्फुरन्तं कमलामनोहरकलिन्दकन्यकाकलहंसकण्ठकलकूजिताद्दृतं मणिनूपुरप्रणयि मञ्जुशिञ्जिताय नमः । (१.१७)
६८. ॐ वल्लवीविभवे नमः । (१.१७)
६९. ॐ तरुणारुणकरुणामयविपुलायतनयनाय नमः । (१.१८)
७०. ॐ कमलाकुचकलशीधरपुलकीकृतहृदयाय नमः । (१.१८)
७१. ॐ मुरलीरवतरलीकृतमुनिमानसनलिनाय नमः । (१.१८)
७२. ॐ मधुराधराय नमः । (१.१८)
७३. ॐ मदचेतसि खेलन्तं अमृताय नमः । (१.१८)

७४. ॐ अर्धनयनाम्बुजचुम्ब्यमानहर्षाकुलामुग्धव्रजवधूमधुराननेन्दवे  नमः । (१.१९)
७५. ॐ आरब्धवेणुरवाय नमः । (१.१९)
७६. ॐ चेतसि आविर्भवन्तं आदिकिशोरमूर्तये नमः । (१.१९)
७७. ॐ कलक्वणितकङ्कणकरनिरुद्धपीताम्बराय नमः । (१.२०)
७८. ॐ क्रमप्रसृतकुन्तलाय नमः । (१.२०)
७९. ॐ गलितबर्हभूषाय नमः । (१.२०)
८०. ॐ पुनःप्रसृतचापलप्रणयिनीभुजायन्त्रिताय नमः । (१.२०)
८१. ॐ मानसे स्फुरन्तं मदनकेलीशय्योत्थिताय नमः । (१.२०)
८२. ॐ विभवे नमः । (१.२०)
८३. ॐ स्तोकस्तोकनिरुध्यमानमृदुलप्रस्यन्दिमन्दस्मिताय नमः । (१.२१)
८४. ॐ प्रेमोद्भेदनिरर्गलप्रसृमरप्रव्यक्तरोमोद्गमाय नमः । (१.२१)
८५. ॐ श्रोतृश्रोत्रमनोहरव्रजवधूलीलामिथोजल्पिताय नमः । (१.२१)
८६. ॐ क्रीडानिमीलद्दृशाय मिथ्यास्वपते भगवते नमः । (१.२१)
८७. ॐ विचित्रपत्रावलिशालिबालास्तनान्तरे उपास्यमानाय नमः । (१.२२)
८८. ॐ मौनिमनोन्तरे उपास्यमानाय नमः । (१.२२)
८९. ॐ वृन्दावनपादपास्ये उपास्यमानाय नमः । (१.२३)
९०. ॐ अमृतायमानैः आध्मायमानैः समृद्धैः मुरलीनिनादैः मूर्धाभिषिक्ताय नमः । (१.२३)
९१. ॐ यं मधुराकृतिं बालं विलोकयितुमिच्छति तस्मै नमः । (१.२३)
९२. ॐ शिखिपिञ्छाभरणाय शिशवे नमः । (१.२४)
९३. ॐ विगलन्मधुद्रवस्मितमुद्रामृदुमुखेन्दवे नमः । (१.२४)
९४. ॐ दृशोः युगलं शिशिरीकुर्वाणाय नमः । (१.२४)
९५. ॐ कालिन्दीकुवलयदलश्यामलतराय करुणावीचिनिचिताय कटाक्षाय नमः । (१.२६)
९६. ॐ कन्दर्पप्रतिभटजटाचन्द्रशिशिराय मुरलीकेलिनिनदाय नमः । (१.२६)
९७. ॐ कमपि अन्तस्तोषदायकाय नमः । (१.२६)
९८. ॐ अधीरालोकिताय नमः । (१.२७)
९९. ॐ आर्द्रजल्पिताय नमः । (१.२७)
१००. ॐ गम्भीरविलासमन्थरगामिने  नमः । (१.२७)
१०१. ॐ अमन्दमालिङ्गिताय नमः । (१.२७)
१०२. ॐ आकुलोन्मदस्मिताय नमः । (१.२७)
१०३. ॐ गोपिकानाथाय नमः । (१.२७)
१०४. ॐ अस्तोकस्मितभराय नमः । (१.२८)
१०५. ॐ आयतायताक्षाय नमः । (१.२८)

१०६. ॐ व्रजाङ्गनाभिः निश्शेषस्तनमृदितमहसे नमः । (१.२८)

१०७. ॐ निस्सीमस्तबकितनीलकान्तिधारायै नमः । (१.२८)

१०८. ॐ त्रिभुवनसुन्दराय नमः । (१.२८)

१०९. ॐ द्रष्टुं काङ्क्षिताय नमः । (१.२८)

११०. ॐ वांशीनिनादानुचरमधुरकटाक्षाय नमः । (१.२९)

१११. ॐ "त्वयि प्रसन्ने इह अपरैः किं नः, त्वय्यप्रसन्ने इह अपरैः किं नः, इति तव प्रसादसिद्ध्यर्थं प्रार्थ्यमानाय भगवते नमः । (१.२९)

११२. ॐ "भवत्कटाक्षदाक्षिण्यलेशेन सकृत् निषिञ्चः" इति निबद्धमुग्धाञ्जलिना नीरन्ध्रदैन्योन्नतमुक्तकण्ठेन याच्यमानाय नमः । (१.३०)

११३. ॐ दयाम्बुधये नमः । (१.३०)

११४. ॐ पिञ्छावतंसरचनोचितकेशपाशाय नमः । (१.३१)

११५. ॐ पीनस्तनीनयनपङ्कजपूजनीयाय नमः । (१.३१)

११६. ॐ चन्द्रारविन्दविजयोद्यतवक्त्रबिम्बाय नमः । (१.३१)

११७. ॐ यस्य शैशवे नो नयनं चापल्यं एति तस्मै नमः । (१.३१)

११८. ॐ त्रिभुवनाद्भुतशैशवाय नमः । (१.३२)

११९. ॐ यत्चापलं वाग्विभवैः अगम्यं तस्मै नमः । (१.३२)

१२०. ॐ विरणन्मुरलीविलासमुग्धमुखाम्बुजाय नमः । (१.३२)

१२१. ॐ "ईक्षणाभ्यां उदीक्षितुं किं करोमि" इति पृच्छ्यमानाय नमः । (१.३२)

१२२. ॐ पर्याचितामृतरसानि पदार्थभङ्गीवल्गूनि बाल्याधिकानि मदवल्लवभावितानि जल्पकारिणे नमः । (१.३३)

१२३. ॐ वल्गितविशालविलोचनाय नमः । (१.३३)

१२४. ॐ यस्य दर्शनजल्पनादि सुदृशां भावे लुठन्ति तस्मै नमः । (१.३३)

१२५. ॐ प्रसन्नमुखतेजसे नमः । (१.३४)

१२६. ॐ पुरः अवतीर्णाय कृपामहाम्बुधये नमः । (१.३४)

१२७. ॐ यस्य मुरलीरवामृतं एव समाधिविघ्नाय कदा नु भवेत् इति प्रार्थ्यमानाय नमः । (१.३४)

१२८. ॐ मुग्धचपलेन भावेन विलोकनेन मानसे किमपि चापलं उद्वहते नमः । (१.३५)

१२९. ॐ लोलेन ईक्षणेन उपगूहितुं काङ्क्ष्यमाणाय लोचनरसायनाय लीलाकिशोराय नमः । (१.३५)

१३०. ॐ यस्य अनेन केनापि मनोहरेण अधीरबिम्बाधरविभ्रमेण हर्षार्द्रवेणुस्वरसम्पदा च मनः धुनोति तस्मै नमः । (१.३६)

१३१. ॐ "यावत् भवोपतापः निखिलमर्मदृढाभिघातनिस्सन्धिबन्धनं न उदेति तावत् तावकवक्त्रचन्द्रचन्द्रातपद्विगुणिता चित्तधारा भवतु" इति प्रार्थ्यमानाय नमः । (१.३७)

१३२. ॐ यावत् दशमी नरदशा दृशः रन्ध्रात् अपि तिमिरीकृतसर्वभावाः उदेति तावत् लावण्यकेलीसदनं समुत्कणितवेणु भगवत्मुखेन्दुबिम्बं लक्ष्यं एतु इति प्रार्थ्यमानाय नमः । (१.३८)

१३३. ॐ यस्य आलोललोचनविलोकनकेलिधारानीराजिताग्रसरणेः करुणाम्बुराशेः प्रतिनादपूरैः वेणुनिनदैः आर्द्राणि मणिनूपुरशिञ्जितानि आकर्णयति तस्मै नमः । (१.३९)

१३४. ॐ जगदेकबन्धवे नमः । (१.४०)

१३५. ॐ करुणैकसिन्धवे नमः । (१.४०)

१३६. ॐ रमणाय नयनाभिरामाय नमः । (१.४०)

१३७. ॐ "कदा नु दृशोः पदं भवितासि "इति विलप्यमानाय नमः । (१.४०)

१३८. ॐ अनाथबन्धवे नमः । (१.४१)

१३९. ॐ करुणैकसिन्धवे नमः । (१.४१)

१४०. ॐ हरये नमः । (१.४१)

१४१. ॐ "त्वदालोकनं अन्तरेण अधन्यानि अमूनि दिनान्तराणि हा हन्त हा हन्त कथं नयाति" इति विलप्यमानाय नमः । (१.४१)

१४२. ॐ मधुरमधुरस्मेराकाराय नमः । (१.४२)

१४३. ॐ मनोनयनोत्सवाय नमः । (१.४२)

१४४. ॐ "इह किं शृणुमः, कस्य भ्रूमः, कथं भ्रूमः, आशाया कृतं, अन्यां धन्यां कथां, अहो हृदयेशयः" इति प्रलपन् यस्मिन् चिरं कृपणकृपण तृष्णा लम्बते तस्मै नमः । (१.४२)

१४५. ॐ अम्बुजदललिलतलोचनाय नमः । (१.४३)

१४६. ॐ आभ्यां विलोचनाभ्यां द्वाभ्यामपि यं बालं परिरब्धुं दैवसामग्री दूरे तस्मै नमः । (१.४३)

१४७. ॐ अश्रान्तस्मितमरुणारुणाधरोष्ठाय नमः । (१.४४)

१४८. ॐ हर्षाद्रद्विगुणमनोज्ञवेणुगीतवादकाय नमः । (१.४४)

१४९. ॐ विभ्राम्यद्विपुलविलोचनार्धमुग्धवदनाम्बुजाय नमः । (१.४४)

१५०. ॐ "तव वदनाम्बुजं कदा नु वीक्षिषिअति" इति प्रार्थ्यमानाय नमः । (१.४४)

१५१. ॐ कारुणिकाय किशोराय नमः । (१.४५)

१५२. ॐ "रसशीतलाभ्यां नीलारुणाभ्यां अद्भुतविभ्रमाभ्यां नयनाम्बुजाभ्यां कदा काले आलोकयेत्" इति प्रार्थ्यमानाय नमः । (१.४५)

१५३. ॐ बहुलचिकुरभाराय नमः । (१.४६)

१५४. ॐ बद्धपिञ्छावतंसाय नमः । (१.४६)

१५५. ॐ चपलचपलनेत्राय नमः । (१.४६)

१५६. ॐ चारुबिम्बाधरोष्ठाय नमः । (१.४६)

१५७. ॐ मधुरमृदुलहासाय नमः । (१.४६)

१५८. ॐ मन्थरोदारलीलाय नमः । (१.४६)
१५९. ॐ नयनेन मृग्यमानाय मुग्धवेषधारिणे नमः । (१.४६)
१६०. ॐ बहुलजलदच्छायाचोराय नमः । (१.४७)
१६१. ॐ विलासभरालसाय नमः । (१.४७)
१६२. ॐ मदशिखिशिखालीलोत्तंसाय नमः । (१.४७)
१६३. ॐ मनोज्ञमुखाम्बुजाय नमः । (१.४७)
१६४. ॐ कमलापाङ्गोदग्राय नमः । (१.४७)
१६५. ॐ प्रपन्नजगज्जिताय नमः । (१.४७)
१६६. ॐ मृग्यमानाय कमपि मधुरिमपरीपाकोद्रेकाय नमः । (१.४७)
१६७. ॐ मुनीनां परिषदि दूरे परामृश्याय नमः । (१.४८)
१६८. ॐ व्रजवधूदृशां शश्वत् दृश्याय नमः । (१.४८)
१६९. ॐ त्रिभुवनमनोहारिवदनाय नमः । (१.४८)
१७०. ॐ अनिदमुदयानां वाचामपि अनामृश्याय नमः । (१.४८)
१७१. ॐ दरदलितनीलोत्पलनिभाय नमः । (१.४८)
१७२. ॐ "कदा दरीदृश्यते" इति प्रार्थ्यमानाय नमः । (१.४८)
१७३. ॐ लीलाम्बुजाननाय नमः । (१.४९)
१७४. ॐ अधीरमुदीक्षमाणाय नमः । (१.४९)
१७५. ॐ वेणुविवरेषु नर्माणि निवेशयते नमः । (१.४९)
१७६. ॐ दोलायमाननयनाय नमः । (१.४९)
१७७. ॐ नयनाभिरामाय नमः । (१.४९)
१७८. ॐ "कदा नु व्यतिलोकयिष्यते" इति प्रार्थ्यमानाय नमः । (१.४९)
१७९. ॐ लम्पटसम्प्रदायरेखावलेखनरसज्ञमनोज्ञवेषधराय नमः । (१.५०)
१८०. ॐ लज्जत् मृदुस्मितमधुस्नपिताधरांशवे नमः । (१.५०)
१८१. ॐ राकेन्दुलालितमुखेन्दवे नमः । (१.५०)
१८२. ॐ मनसि मुहुः लग्नमुकुन्दबाल्याय नमः । (१.५०)
१८३. ॐ अहिमकरकरनिकरमृदुमृदितलक्ष्मीसरसतरसरसिरुहसरसदृशे नमः । (१.५१)
१८४. ॐ व्रजयुवतिरतिकलहविजयनिजलीलामदमुदितवदनशशिमधुरिमणि यस्मिन् मनो लीयते तस्मै नमः । (१.५१)
१८५. ॐ करकमलदलदलितललिततरवंशीकलनिनदगलदमृतघनसरसि सहजरसभरभरितदरहसितवीर्च
यस्मिन् मनो लीयते तस्मै नमः । (१.५२)
१८६. ॐ कुसुमशरशरसमरकुपितमदगोपीकुचकलशघुसृणरसलसत् उरसे नमः । (१.५३)

१८७. ॐ मदलुलितमृदुहसितमुषितशशिशोभाधिकमुखकमलमधुरिमणि यस्मिन् मनो मुहुः लीयते तस्मै नमः । (१.५३)
१८८. ॐ असितभ्रुवोः आनम्रां, अक्षीणपक्ष्माङ्कुरेषु उपचितां, अनुरागिणोः नयनयोः आलोलां, मुदौ जल्पिते आर्द्रां, अमृताधरे आताम्रां, अम्लानवंशीरवेषु मदकलां, जगन्मोहिनिं व्रजशिशोः मूर्तिं यद्दर्शनार्थं लोचनं आशास्ते तस्मै नमः । (१.५४)
१८९. ॐ तत् कैशोरं, तत् वक्त्रारविन्दं, तत् कारुण्यं, ते लीलाकटाक्षाः, तत् सौन्दर्यं, सा मन्दस्मितश्री च यत् दैवतेषु दुर्लभं तस्मै नमः । (१.५५)
१९०. ॐ विश्वासस्तबकितचेतसां जनानां विश्वोपप्लवशमनैकबद्धदीक्षाय नमः । (१.५६)
१९१. ॐ प्रतिनवकान्तिकन्दलार्द्राय नमः । (१.५६)
१९२. ॐ पथि पथि पश्यते मुरारेः शैशवाय नमः । (१.५६)
१९३. ॐ चन्द्रकभूषणमौलये नमः । (१.५७)
१९४. ॐ मरतकस्तम्भाभिरामवपुषे नमः । (१.५७)
१९५. ॐ चित्रविमुग्धहासमधुरवक्त्राय नमः । (१.५७)
१९६. ॐ विलोलबालदृशे नमः । (१.५७)
१९७. ॐ शैशवशीतलवाचे नमः । (१.५७)
१९८. ॐ मदगजश्लाघ्यविलासस्थितये नमः । (१.५७)
१९९. ॐ मन्दं मन्दं मथुरावीथीं गाहमानाय नमः । (१.५७)
२००. ॐ पादविनिर्जिताम्बुजवनाभ्यां पद्मालयालङ्कृताभ्यां पादाभ्यां नमः । (१.५८)
२०१. ॐ वेणुविनोदनप्रणयिनाभ्यां पर्याप्तशिल्पश्रियाभ्यां पाणिभ्यां नमः । (१.५८)
२०२. ॐ मृगदृशां दोहदभाजनाभ्यां बाहुभ्यां नमः । (१.५८)
२०३. ॐ माधुर्यधाराभ्यो गीर्भ्यो नमः । (१.५८)
२०४. ॐ वाग्विभवातिलङ्घितवक्त्राय नमः । (१.५८)
२०५. ॐ बर्हं नाम विभूषणाय, वेषाय बहुमताय, शेषैरलं वक्त्राय नमः । (१.५९)
२०६. ॐ चित्रविशेषकान्तिलहरीविन्यासधन्याधराय नमः । (१.५९)
२०७. ॐ अल्पधियां अगम्यविभवैः शिल्पैः शृङ्गारभङ्गीमयाय नमः । (१.५९)
२०८. ॐ विचित्रचित्रमहसे नमः । (१.५९)
२०९. ॐ अग्रे कामपि केलिलक्ष्मीं समग्रयति, अन्यासु दिक्ष्वपि विलोचनं एव साक्षी, जगत्त्रयं यस्य किशोरमयं तस्मै नमः । (१.६०)
२१०. ॐ विरलभ्रमरबहुलचिकुराय नमः । (१.६१)
२११. ॐ मृदुलवचनाय नमः । (१.६१)
२१२. ॐ विपुलनयनाय नमः । (१.६१)
२१३. ॐ मधुराधराय नमः । (१.६१)

२१४. ॐ ललितवदनाय नमः । (१.६१)
२१५. ॐ चपलचरिताय नमः । (१.६१)
२१६. ॐ "कदा नु भवे" इति प्रार्थ्यमानाय नमः । (१.६१)
२१७. ॐ कृपालयाय नमः । (१.६२)
२१८. ॐ आत्मबान्धवाय नमः । (१.६२)
२१९. ॐ "परिपालय नः" इत्यसकृत् जल्पितं मुरलीमृदुस्वनान्तरे कदा नु विभुं आकर्णयिताः" इति प्रार्थ्यमानाय नमः । (१.६२)
२२०. ॐ कैशोरगन्धये करुणानिधये नमः । (१.६३)
२२१. ॐ "कस्यां विपद्दशायां विपुलायताभ्यां विलोचनाभ्यां नः विलोकयिष्यन् विषयीकरोति" इति प्रार्थ्यमानाय नमः । (१.६३)
२२२. ॐ मधुराधरबिम्बाय नमः । (१.६४)
२२३. ॐ मञ्जुलमन्दहासाय नमः । (१.६४)
२२४. ॐ शिशिरामृतवाक्याय नमः । (१.६४)
२२५. ॐ शीतलदृष्टिपाताय नमः । (१.६४)
२२६. ॐ विपुलारुणनेत्राय नमः । (१.६४)
२२७. ॐ विश्रुतवेणुनादाय नमः । (१.६४)
२२८. ॐ मरतकमणिनीलबालाय नमः । (१.६४)
२२९. ॐ माधुर्यात् अपि मधुराय नमः । (१.६५)
२३०. ॐ चापल्यात् अपि चपलाय नमः । (१.६५)
२३१. ॐ मन्मथताताय नमः । (१.६५)
२३२. ॐ चेतो हरते किमपि कैशोराय नमः । (१.६५)
२३३. ॐ विपुलवक्षस्थलाय नमः । (१.६६)
२३४. ॐ विपुलनयनोत्पलाय नमः । (१.६६)
२३५. ॐ मृदुलमन्दस्मिताय नमः । (१.६६)
२३६. ॐ मृदुलमदजल्पिताय नमः । (१.६६)
२३७. ॐ मृदुलबिम्बाधराय नमः । (१.६६)
२३८. ॐ मधुरविलासनिधये नमः । (१.६६)
२३९. ॐ आर्द्रावलोकितदयापरिणद्धनेत्राय नमः । (१.६७)
२४०. ॐ आविष्कृतस्मितसुधामधुराधरोष्ठाय नमः । (१.६७)
२४१. ॐ आद्याय पुंसे नमः । (१.६७)
२४२. ॐ कृतपुण्यपुञ्जाः कृतिनः आलोक्यमानाय नमः । (१.६७)
२४३. ॐ "मारः स्वयं नु" इति शङ्क्यमानाय नमः । (१.६८)

२४४. ॐ मधुरद्युतिमण्डलाय नमः । (१.६८)
२४५. ॐ “माधुर्यं एव नु” इति शङ्क्यमानाय नमः । (१.६८)
२४६. ॐ मनोनयनामृताय नमः । (१.६८)
२४७. ॐ “वाणीमृजा नु” इति शङ्क्यमानाय नमः । (१.६८)
२४८. ॐ जीवितवल्लभाय नमः । (१.६८)
२४९. ॐ लोचनाय अभ्युदयमानाय नमः । (१.६८)
२५०. ॐ आलोलविलोचनाय नमः । (१.६९)
२५१. ॐ चित्रीकृतदिङ्मुखाय नमः । (१.६९)
२५२. ॐ वक्त्रेण घोषोचितभूषणेन मुग्धेन वेषेण च नयनोत्सवाय नमः । (१.६९)
२५३. ॐ आन्दोलिताग्रभुजाय नमः । (१.७०)
२५४. ॐ आकुलनेत्रलीलाय नमः । (१.७०)
२५५. ॐ आर्द्रस्मितार्द्रवदनाम्बुजचन्द्रबिम्बाय नमः । (१.७०)
२५६. ॐ शिञ्जानभूषणशताय नमः । (१.७०)
२५७. ॐ शिखिपिञ्छमौलिने नमः । (१.७०)
२५८. ॐ शीताय विलोचनरसायनाय नमः । (१.७०)
२५९. ॐ पशुपालबालपरिषद्विभूषणाय नमः । (१.७१)
२६०. ॐ शीतलविलोललोचनाय नमः । (१.७१)
२६१. ॐ मृदुलस्मितार्द्रवदनेन्दु सम्पदा हृदयं मदयन् विगाह्मानाय नमः । (१.७१)
२६२. ॐ तमालनीलाय नमः । (१.७२)
२६३. ॐ तरलविलोचनतारकाभिरामाय नमः । (१.७२)
२६४. ॐ मुदितमुदितवक्त्रचन्द्रबिम्बाय नमः । (१.७२)
२६५. ॐ मुखरितवेणवे नमः । (१.७२)
२६६. ॐ चापल्यसीमायै नमः । (१.७३)
२६७. ॐ चपलानुभवैकसीमायै नमः । (१.७३)
२६८. ॐ चातुर्यसीमायै नमः । (१.७३)
२६९. ॐ चतुराननशिल्पसीमायै नमः । (१.७३)
२७०. ॐ सौरभ्यसीमायै नमः । (१.७३)
२७१. ॐ सकलाद्भुतकेलिसीमायै नमः । (१.७३)
२७२. ॐ सौभाग्यसीमायै नमः । (१.७३)
२७३. ॐ व्रजभाग्यसीमायै नमः । (१.७३)
२७४. ॐ माधुर्येण द्विगुणशिशिरं वक्त्रचन्द्रं वहते नमः । (१.७४)
२७५. ॐ वंशीवीथिविगलदमृतस्रोतसा सेचयते नमः । (१.७४)

२७६. ॐ वाणीनां विहरणपदाय नमः । (१.७४)
२७७. ॐ पुण्यानां परिणतये नमः । (१.७४)
२७८. ॐ नेत्रयोः सन्निदधाते नमः । (१.७४)
२७९. ॐ धेनुपालिने नमः । (१.७५)
२८०. ॐ लोकपालिने नमः । (१.७५)
२८१. ॐ राधापयोधरोत्सङ्गशायिने नमः । (१.७५)
२८२. ॐ शेषशायिने नमः । (१.७५)
२८३. ॐ तेजसे नमः । (१.७५)
२८४. ॐ धेनुपालदयितास्तनस्थलीधन्यकुङ्कुमसनाथकान्तये नमः । (१.७६)
२८५. ॐ वेणुगीतगतिमूलवेधसे नमः । (१.७६)
२८६. ॐ तत् इदं ॐ नमः । (१.७६)
२८७. ॐ मृदुक्वणन् नूपुरमन्थरेण बालेन पादाम्बुजपल्लवेन आत्तकेलि अनुस्वनन्मञ्जुलवेणुगीताय नमः । (१.७७)
२८८. ॐ उदञ्चितं कर्णयुग्मं विलासमुरलीनिनदामृतेन सिञ्चन् आयते नमः । (१.७८)
२८९. ॐ अनन्यबन्धवे नमः । (१.७८)
२९०. ॐ नयनबन्धवे नमः । (१.७८)
२९१. ॐ आनन्दकन्दलितकेलिकटाक्षलक्ष्याय नमः । (१.७८)
२९२. ॐ वारणखेलगामिने नमः । (१.७९)
२९३. ॐ धाराकटाक्षभरितविलोचनाय नमः । (१.७९)
२९४. ॐ हृदयङ्गमवेणुनादवेणीदुघ्दशनावरणाय नमः । (१.७९)
२९५. ॐ त्रिभुवनसरसाभ्यां पदाभ्यां नमः । (१.८०)
२९६. ॐ दीप्तभूषापदाभ्यां नमः । (१.८०)
२९७. ॐ दृशि दृशि शिशिराभ्यां पदाभ्यां नमः । (१.८०)
२९८. ॐ दिव्यलीलाकलाभ्यां पदाभ्यां नमः । (१.८०)
२९९. ॐ अशरणशरणाभ्यां पदाभ्यां नमः । (१.८०)
३००. ॐ अनुकूजद्वेणु आयाते अद्भुताभ्यां देवपादाभ्यां नमः । (१.८०)
३०१. ॐ मुनीन्द्रजनमानसतापहारिणे नमः । (१.८१)
३०२. ॐ मदव्रजवधूवसनापहारिणे नमः । (१.८१)
३०३. ॐ तृतीयभुवनेश्वरदर्पहारिणे नमः । (१.८१)
३०४. ॐ हृदयाम्बुरुहापहारिणे नमः । (१.८१)
३०५. ॐ सर्वज्ञत्वे मौग्ध्ये च सार्वभौमाय नमः । (१.८२)
३०६. ॐ यस्य तेजो निर्विशन् नयनं निर्वाणपदं अश्नुते तस्मै नमः । (१.८२)

३०७. ॐ उष्णेतरांशोः मुखेन्दोः उदयं पुनरुक्तशोभं पुष्णानाय  नमः । (१.८३)
३०८. ॐ किञ्चन कृष्णाह्वयाय नमः । (१.८३)
३०९. ॐ तृष्णाम्बुराशिं द्विगुणीकुरुते कृष्णाह्वयाय नमः । (१.८३)
३१०. ॐ आताम्रविलोचनश्रीसम्भाविताशेषविनम्रवर्गमधुराधरोष्ठाय नमः । (१.८४)
३११. ॐ मानसं चुम्बयते मुरारेः वदनाम्बुजाय नमः । (१.८४)
३१२. ॐ शरदुदञ्चिताम्बुजविलासशिक्षागुरुकराभ्यां नमः । (१.८५)
३१३. ॐ विबुधपादपप्रथमपल्लवोल्लङ्घिपदाभ्यां नमः । (१.८५)
३१४. ॐ दलितदुर्मदत्रिभुवनोपमानश्रीदृशाभ्यां नमः । (१.८५)
३१५. ॐ विलोचनामृतमहत्शैशवाय नमः । (१.८५)
३१६. ॐ अहन्यहन्यहनि साकारान् विहारक्रमान् आचिन्वानाय नमः । (१.८६)
३१७. ॐ आर्द्रस्मितास्यश्रिया अरुन्धतीहृदयमपि आरुन्धानाय नमः । (१.८६)
३१८. ॐ अनन्यजन्मनयनश्लाघ्यां अनर्घ्यां दशां आतन्वानाय नमः । (१.८६)
३१९. ॐ व्रजसुन्दरीस्तनतटीसाम्राज्याय नमः । (१.८६)
३२०. ॐ आमन्दं उज्जृम्भमानाय नमः । (१.८६)
३२१. ॐ तरलशैशवालङ्कृताय नमः । (१.८७)
३२२. ॐ समुच्छ्वसितयौवनाय नमः । (१.८७)
३२३. ॐ मदच्छुरितलोचनाय नमः । (१.८७)
३२४. ॐ मदनमुग्धहासामृताय नमः । (१.८७)
३२५. ॐ प्रतिक्षणविलोभनाय नमः । (१.८७)
३२६. ॐ प्रणयपीतवंशीमुखाय नमः । (१.८७)
३२७. ॐ जगत्त्रयविमोहनाय नमः । (१.८७)
३२८. ॐ यस्य चरणारविन्दं चित्रं तस्मै नमः । (१.८८)
३२९. ॐ यस्य नयनारविन्दं चित्रं तस्मै नमः । (१.८८)
३३०. ॐ यस्य वदनारविन्दं चित्रं तस्मै नमः । (१.८८)
३३१. ॐ यस्य तत् एतत् चित्रं तस्मै नमः । (१.८८)
३३२. ॐ अखिलभुवनैकभूषणाय नमः । (१.८९)
३३३. ॐ जलधिदुहितृकुचकुम्भाधिभूषणाय नमः । (१.८९)
३३४. ॐ व्रजयुवतिहारवल्लीमरतकनायकमहामणये नमः । (१.८९)
३३५. ॐ कान्ताकचग्रहणविग्रहलब्धलक्ष्मी खण्डाङ्गरागलवलवरञ्जितमञ्जुलश्री गण्डस्थलीमुकुरमण्डलखेलमानघर्माङ्कुरं खेलते किमपि कृष्णतेजसे नमः । (१.९०)
३३६. ॐ कृष्णतेजसे नमः । (१.९०)
३३७. ॐ मधुरमधुरवपुषे नमः । (१.९१)

३३८. ॐ मधुरमधुरवदनाय नमः । (१.९१)
३३९. ॐ मधुगन्धिमृदुस्मिताय नमः । (१.९१)
३४०. ॐ मधुरमधुरमधुरविभवे नमः । (१.९१)
३४१. ॐ शृङ्गाररससर्वस्वाय नमः । (१.९२)
३४२. ॐ शिखिपिञ्छविभूषणाय नमः । (१.९२)
३४३. ॐ अङ्गीकृतनराकाराय नमः । (१.९२)
३४४. ॐ भुवनाश्रयाय नमः । (१.९२)
३४५. ॐ यं सुदृशां सहस्त्रं कदाचन दर्शनेन, चित्तेन, उपनिषदा च अद्यापि न पश्यति तस्मै नमः । (१.९३)
३४६. ॐ स्वामिने नमः । (१.९३)
३४७. ॐ केशवाय नमः । (१.९४)
३४८. ॐ "मुखेन्दोः इयं कान्ति का" इति स्तुताय नमः । (१.९४)
३४९. ॐ वाचां अभूमये नमः । (१.९४)
३५०. ॐ "अयं कोऽपि वेषः का", इया स्वादुता का, इया मञ्जुलश्री का" इत्येवं वदन् भूयः भूयः, भूयशः नमस्कृताय नमः । (१.९४)
३५१. ॐ शशिनं विनिर्जितवदनेन्दवे नमः । (१.९५)
३५२. ॐ यस्य पदं दशधा प्राप्य शशी अधिकं श्रियं अश्नुतेतरां तस्मै नमः । (१.९५)
३५३. ॐ "तव कारुण्यविजृम्भितं कियत्" इति वर्णिताय नमः । (१.९५)
३५४. ॐ "वाङ्माधुरीबहुलपर्वकलासमृद्धं मुखं कथं अब्जसमानकक्ष्यं" इति वर्णिताय नमः । (१.९६)
३५५. ॐ "भुवनैककान्तं अपरं किं, सदा त्वदाननसमा सुषमा कस्य स्यात्" इत्यपि वर्णिताय नमः । (१.९६)
३५६. ॐ शशिप्रदीपः यस्य आननेन्दोः चिराय नीराजनक्रमधुरां निर्व्याजं वहति तस्मै नमः । (१.९७)
३५७. ॐ अखण्डनिर्वाणरसप्रवाहैः विखण्डिताशेषरसान्तराणि नियन्त्रितोद्वान्तसुधार्णवानि शीतानि स्मितानि युक्ताय नमः । (१.९८)
३५८. ॐ यस्मिन् एव रमणीयतापरिणति पारं गता तस्मै नमः । (१.९९)
३५९. ॐ मन्दारमूले मदनाभिरामाय बिम्बाधरापुरितवेणुनादाय गोगोपगोपीजनमध्यसंस्थाय गोकुलपूर्णचन्द्राय गोपाय नमः । (१.१००)
३६०. ॐ यस्मिन् स्थाने जाते लोला गोपवनिताः गलद्व्रीलाः मदनवनिताः, तथा स्फीतं गितं मधु च (अभवत्)तस्मै नमः । (१.१०१)

३६१. ॐ चापलधुरया किमपि मधुरया मधुरिमगिरा समुज्जृम्भमाणया गुम्भेन चपलं जन्म सफलं दधानाय नमः । (१.१०१)

३६२. ॐ यस्य भवनं भुवनं, विलासिनी श्री, तनयौ तामरसासनः स्मरश्च, परिचारपरम्पराः सुरेन्द्राः, चरितं विचित्रं तस्मै नमः । (१.१०२)

३६३. ॐ त्रिलोकीसौभाग्यकस्तूरीतिलकाङ्कुराय नमः । (१.१०३)

३६४. ॐ व्रजङ्गनानङ्गकेलीललितविभ्रमाय नमः । (१.१०३)

३६५. ॐ प्रेमदाय कामदाय वेदनाय वैभवाय जीवनाय जीविताय दैवताय नमः । (१.१०४)

३६६. ॐ वाचः यस्य वैभवैः माधुर्येण विजृम्भन्ते चिन्ताः यस्य शैशवे चापल्येन विवर्धन्ते तस्मै नमः । (१.१०५)

३६७. ॐ "धन्यात्मनां रसनालेह्यानि यानि चरितामृतानि, राधापरधोन्मुखाः ये वा शैशवचापलव्यतिकराः। मुखाम्भोरुहे भावितवेणुगीतिगतयः याः वा लीलाः, तानि एव हृदये धारावाहिकया वहन्तु" इति प्रार्थ्यमानाय नमः । (१.१०६)

३६८. ॐ यस्मिन् कलितदिव्यकिशोरवेषे दैवेन स्थिरतराः भक्तिः यदि स्यात् मुक्तिः स्वयं मुकुलिताञ्जलि अस्मान् सेवते, धर्मार्थकामगतयः समयप्रतीक्षाः च तस्मै भगवते नमः । (१.१०७)

३६९. ॐ देवदेवदेवाय नमः । (१.१०८)

३७०. ॐ त्रिभुवनमङ्गलदिव्यनामधेयाय नमः । (१.१०८)

३७१. ॐ श्रवणमनोनयनामृतावताराय नमः । (१.१०८)

३७२. ॐ बालकृष्णदेवाय नमः । (१.१०८)

३७३. ॐ निर्भरहर्षवर्षविवशावेशस्फुटाविर्भवच्चापल्येन विभूषितेषु सुकृतां भावेषु निर्भासमानाय नमः । (१.१०९)

३७४. ॐ श्रीमद्गोकुलमण्डनाय नमः । (१.१०९)

३७५. ॐ वाचां विदूरस्फुरन्माधुर्यैकरसार्णवाय नमः । (१.१०९)

३७६. ॐ महते महसे नमः । (१.१०९)

३७७. ॐ ईशानदेवचरणाभरणेन नीलीदामोदरस्थिरयशस्तबकोद्गमेन लीलाशुकेनरचितेन श्रीकृष्णकर्णामृतस्तवेन स्तुताय नमः । (१.११०)

३७८. ॐ कृष्णाय नमः । (१.११०)

## द्वितीयसर्गः

३७९. ॐ अभिनवनवनीतस्निग्धाय नमः । (२.१)

३८०. ॐ मुग्धाङ्गाय नमः । (२.१)

३८१. ॐ आपीतदुग्धाय नमः । (२.१)

३८२. ॐ दधिकणपरिदिग्धाय नमः । (२.१)
३८३. ॐ तापिञ्छगुच्छच्छवये नमः । (२.१)
३८४. ॐ नवशिखिपिञ्छालाञ्छिताय नमः । (२.१)
३८५. ॐ भुवनकृच्छ्रछेदिने नमः । (२.१)
३८६. ॐ वाञ्छितदायकाय नमः । (२.१)
३८७. ॐ अनिशं यमुनां पिपासुः गवां व्यूहः यं दृष्ट्वा गाहते तस्मै नमः । (२.२)
३८८. ॐ पावनीकान्तिवपुषे नमः । (२.२)
३८९. ॐ नीलकण्ठनिवहः विद्युत्वान् इति यां द्रष्टुं उलकण्ठते तस्मै नमः । (२.२)
३९०. ॐ उत्तंसाय गोपिकाः तमालपल्लवं इति यां छिन्दन्ति तस्मै नमः । (२.२)
३९१. ॐ पावनकान्तये नमः । (२.२)
३९२. ॐ कालियशासनाय नमः । (२.२)
३९३. ॐ विमले यामुने पयसि मज्जतीनां गोपस्त्रीणां (वसनचोर)वञ्चकाय नमः । (२.३)
३९४. ॐ अंशुकानि अनुनयपदैः याचन्तीनां गोपस्त्रीणां लज्जालोलैः अलसविलासैः उन्मिषद्पञ्चबाणैः नयनकुसुमैः अर्चिताय नमः । (२.३)
३९५. ॐ जठरपिठरीपूर्तये खलानां पुरस्तात् नर्तितानुचिताक्षन्तव्यापराधक्षमापणार्थं यस्य गोपवेषस्य गुणगणना प्रायश्चित्तं भवति तस्मै नमः । (२.४)
३९६. ॐ विष्णवे नमः । (२.४)
३९७. ॐ अरुणकिरणैः अङ्गुल्यग्रैः मुक्तसंरुद्धरन्ध्रं वारं वारं वदनमरुता वेणुं आपूरयते नमः । (२.५)
३९८. ॐ विकचकमलच्छायविस्तारिनेत्राय नमः । (२.५)
३९९. ॐ वृन्दावनसुचरितव्यत्यस्ताङ्घ्रये नमः । (२.५)
४००. ॐ नन्दगोपालसूनवे नमः । (२.५)
४०१. ॐ मन्दं मन्दं मधुरनिनदैः वेणुं आपूरयन्तं वृन्दावनभुवि गवां वृन्दं चारयन्तं चरते नमः । (२.६)
४०२. ॐ शतमखध्वंसिनां दानवानां हन्त्रे नमः । (२.६)
४०३. ॐ गोपकन्याभुजङ्गाय नमः । (२.६)
४०४. ॐ वेणीमूले विरचितघनश्यामपिञ्छावचूडाय नमः । (२.७)
४०५. ॐ विद्युल्लेखावलयितः इव स्निग्धपीताम्बराय नमः । (२.७)
४०६. ॐ तरुणतुलसीभूषणाय नमः । (२.७)
४०७. ॐ नीलमेघाय नमः । (२.७)
४०८. ॐ मरतकमणिस्तम्भगम्भीरबाहवे नमः । (२.७)
४०९. ॐ वसननिचयं हृत्वा कुलकुञ्जाधिरूढाय नमः । (२.८)

४१०. ॐ काचित् मुग्धया मुहुः अनुनयैः “किं नु इति” व्याहरन्ती सुभ्रूभङ्गं सदरहसितं सत्रपं सानुरागं यस्य करतलगतान्यम्बराणि आचकर्ष तस्मै छायाशौरये नमः । (२.८)
४११. ॐ “परस्मिन् जनुषि आत्तपुण्यः यमुनायाः तटभुवि यस्याधरमणिसमीपन्यासधन्यां अवस्थां वंशनालो भवेयं” इति प्रार्थ्यमानाय नमः । (२.९)
४१२. ॐ श्रीमदाभीरसूनवे नमः । (२.९)
४१३. ॐ अम्भोजनेत्राय नमः । (२.१०)
४१४. ॐ कबरकलितचञ्चत्पिञ्छदामाभिरामाय नमः । (२.१०)
४१५. ॐ वलभिदुपलनीलाय नमः । (२.१०)
४१६. ॐ वल्लवीभागधेयाय नमः । (२.१०)
४१७. ॐ निखिलनिगमवल्लीमूलकन्दाय नमः । (२.१०)
४१८. ॐ मुकुन्दाय नमः । (२.१०)
४१९. ॐ अधरमणिसमीपं प्राप्य रहसि कर्णे “दशां कथय” इति यस्य मुरलिं प्रणम्य याचते तस्मै नमः । (२.११)
४२०. ॐ नन्दसूनवे नमः ।
४२१. ॐ स्मेरवक्त्रारविन्दश्वसनमधुरसंज्ञामुरलीधराय नमः ।
४२२. ॐ सजलजलदनीलाय नमः । (२.१२)
४२३. ॐ वल्लवीकेलिलोलाय नमः । (२.१२)
४२४. ॐ विद्युदुल्लासिचेलाय नमः । (२.१२)
४२५. ॐ श्रितसुरतरुमूलाय नमः । (२.१२)
४२६. ॐ नतसुरमुनिजालाय नमः । (२.१२)
४२७. ॐ सन्मनोबिम्बलीलाय नमः । (२.१२)
४२८. ॐ सुररिपुकुलकालाय नमः । (२.१२)
४२९. ॐ गोपालबालाय नमः । (२.१२)
४३०. ॐ अधरबिम्बविडम्बितविद्रुमाय नमः । (२.१३)
४३१. ॐ मधुरवेणुनिनादविनोदिताय नमः । (२.१३)
४३२. ॐ कमलकोमलकम्रमुखाम्बुजाय नमः । (२.१३)
४३३. ॐ गोपकुमाराय नमः । (२.१३)
४३४. ॐ अधरे वंशनालं निवेश्य अस्य विवराणि सलीलं अङ्गुलीभिः मुहुः अन्तरयन् मुहुः विवृण्वन् मधुरं गायते नमः । (२.१४)
४३५. ॐ माधवाय नमः । (२.१४)
४३६. ॐ वदने नवनीतगन्धवाहाय नमः । (२.१५)
४३७. ॐ वचने तस्करचातुरीधुरीणाय नमः । (२.१५)

४३८. ॐ नयने कुहनाश्रवे नमः । (२.१५)
४३९. ॐ चरणे कोमलताण्डवाय नमः । (२.१५)
४४०. ॐ नन्दनन्दनाय नमः । (२.१६)
४४१. ॐ यमुनारोधसि गोपगोपनार्थं वनसम्भवः दमुनाः पीतवते नमः । (२.१६)
४४२. ॐ शरणार्थिनां शरण्याय नमः । (२.१६)
४४३. ॐ जगदादरणीयजारभावाय नमः । (२.१७)
४४४. ॐ जलजापत्यवचोविचारगम्याय नमः । (२.१७)
४४५. ॐ सुरनाथोपलसुन्दराय नमः । (२.१७)
४४६. ॐ जगतां कापि अभिरामसीमायै नमः । (२.१८)
४४७. ॐ गोपकिशोरमूर्तये नमः । (२.१८)
४४८. ॐ श्रुतिगिरां शेखरे सुलभाय नमः । (२.१८)
४४९. ॐ योगभाजां हृदि सुलभाय नमः । (२.१८)
४५०. ॐ व्रजसुन्दरीणां पादाम्बुजे सुलभाय नमः । (२.१८)
४५१. ॐ अत्यन्तबालाय नमः । (२.१९)
४५२. ॐ अतसीकुसुमप्रकाशाय नमः । (२.१९)
४५३. ॐ दिग्वाससे नमः । (२.१९)
४५४. ॐ कनकभूषणभूषिताङ्गाय नमः । (२.१९)
४५५. ॐ विस्रस्तकेशाय नमः । (२.१९)
४५६. ॐ अरुणाधराय नमः । (२.१९)
४५७. ॐ आयताक्षाय नमः । (२.१९)
४५८. ॐ वसुदेवसूनवे नमः । (२.१९)
४५९. ॐ हस्ताङ्घ्रिनिक्वणितकङ्कणकिङ्किणीकाय नमः । (२.२०)
४६०. ॐ मध्येनितम्बमवलम्बितहेमसूत्राय नमः । (२.२०)
४६१. ॐ मुक्ताकलापमुकुलीकृतकाकपक्षाय नमः । (२.२०)
४६२. ॐ व्रजचराय वसुदेवभाग्याय नमः । (२.२०)
४६३. ॐ वृन्दावने द्रुमतलेषु गवां गणेषु वेदावसानसमयेषु च यत् दृश्यते तत् ब्रह्मणे नमः । (२.२१)
४६४. ॐ वेणुवादनपराय नमः । (२.२१)
४६५. ॐ शिखिपिञ्छचूडाय नमः । (२.२१)
४६६. ॐ कमलेक्षणाय नमः । (२.२१)
४६७. ॐ अभ्रनीलवर्णाय नमः । (२.२१)
४६८. ॐ व्यत्यस्तपादाय नमः । (२.२२)

४६९. ॐ अवतंसितबर्हिबर्हाय नमः । (२.२२)
४७०. ॐ साचीकृताननविवेशितवेणुरन्ध्राय नमः । (२.२२)
४७१. ॐ परमकारुणिकाय नमः । (२.२२)
४७२. ॐ परं तेजसे नमः । (२.२२)
४७३. ॐ "प्राणप्रयाणसमये पुरस्तात् सन्निधत्तां" इति प्रार्थ्यमानाय नमः । (२.२२)
४७४. ॐ घोषप्रघोषशमनाय जननिना मथः गुणेन बन्धिताय नमः । (२.२३)
४७५. ॐ नवनीतचोराय नमः । (२.२३)
४७६. ॐ यस्य बन्धनं त्रिजगतां उदराश्रयाणां नितरां आक्रोशकारणं बभूव तस्मै नमः । (२.२३)
४७७. ॐ नितरां पञ्चाक्षरीजपपराणां शैवाणामपि चेतसि स्मरणीयाय नमः । (२.२४)
४७८. ॐ अतसीकुसुमावभासाय स्मेराननाय नमः । (२.२४)
४७९. ॐ गोपवधूकिशोराय नमः । (२.२४)
४८०. ॐ राधास्तनस्तबकचञ्चललोलदृष्टये दोहनधिया वृषभं निरुन्धते नमः । (२.२५)
४८१. ॐ गोधूलिधूसरितकोमलकुन्तलाग्राय नमः । (२.२६)
४८२. ॐ गोवर्धनोद्धरणकेलिकृतप्रयासाय नमः । (२.२६)
४८३. ॐ गोपीजनस्य कुचकुङ्कुममुद्रिताङ्गाय नमः । (२.२६)
४८४. ॐ इन्दुवदनाय नमः । (२.२६)
४८५. ॐ गोविन्दाय नमः । (२.२६)
४८६. ॐ वाराहजन्मनि अमी समुद्राः यद्रोमरन्ध्रपरिपूर्तिविधौ अदक्षा बभूवुः तस्मै नमः । (२.२७)
४८७. ॐ यशोदा पाणिद्वयान्तरजलैः यं स्नपयां बभूव तस्मै नमः । (२.२७)
४८८. ॐ नाथाय नमः । (२.२७)
४८९. ॐ अरविन्ददृशे नमः । (२.२७)
४९०. ॐ उलूखले निबद्धाय नमः । (२.२८)
४९१. ॐ उपनिषदर्थाय नमः । (२.२८)
४९२. ॐ वल्लवीनां भवनेष्वन्वेष्यमाणाय नमः । (२.२८)
४९३. ॐ देवकीतनयाय नमः । (२.२९)
४९४. ॐ पूतनारिचरणाभ्यां नमः । (२.२९)
४९५. ॐ धनञ्जयसूताय नमः । (२.२९)
४९६. ॐ स्वयं गोपवेषं उपसेदुषः विभवे नमः । (२.३०)
४९७. ॐ भवभयैकभेषजाय नमः । (२.३०)
४९८. ॐ यापि कापि रमणीयता मम मानसे मुहुः मुहुः मुहुः भासमानाय नमः । (२.३०)
४९९. ॐ कर्णलम्बितकदम्बमञ्जरीकेसरारुणकपोलमण्डलाय नमः । (२.३१)

५००. ॐ निगमवागगोचराय नमः । (२.३१)
५०१. ॐ निर्मलाय नमः । (२.३१)
५०२. ॐ नीलिमानाय नमः । (२.३१)
५०३. ॐ साचिसञ्चलितलोचनोत्पलाय नमः । (२.३२)
५०४. ॐ सामिकुञ्चलितकोमालाधराय नमः । (२.३२)
५०५. ॐ वेगवल्गितकराङ्गुलीदलाय नमः । (२.३२)
५०६. ॐ वेणुगानरसिकाय नमः । (२.३२)
५०७. ॐ गरुडमण्डितध्वजे स्यन्दने अधिरोपितां कुण्डिनेशतनयां नीयमानाय नमः । (२.३३)
५०८. ॐ नवतमालपल्लवश्यामलाय नमः । (२.३३)
५०९९९९९९पुरुषाय नमः ।
५१०. ॐ नितम्बबिम्बे विन्यस्तहस्ताय तमालनीलाय दिगम्बराय चित्तवित्तं समाकर्षते भीमरथ्याः पथी स्थिताय नमः । (२.३४)
५११. ॐ अङ्गनां अङ्गनां अन्तरा स्थिताय नमः । (२.३५)
५१२. ॐ माधवं माधवं च अन्तरेण अङ्गना इत्थं मण्डले आकल्पिते मध्यगाय वेणुवादकाय नमः । (२.३५)
५१३. ॐ कंसवंशाटवीदाहदावानलाय नमः । (२.३६)
५१४. ॐ केकिकेकादृतानेकपङ्केरुहालीनहंसावलीहृद्यताहृद्यता वेणुवादकाय नमः । (२.३६)
५१५. ॐ देवकीनन्दनाय नमः । (२.३६)
५१६. ॐ क्वापि वीणाभिराराविना कम्पिताः वेणुवादकाय नमाः (२.३७)
५१७. ॐ क्वापि वीणाभिराकिङ्कीणीनर्तितः वेणुवादकाय नमः” (२.३७)
५१८. ॐ क्वापि वीणाभिरामान्तरं गापितः वेणुवादकाय नमः । (२.३७)
५१९. ॐ चारुचन्द्रावलीलोचनैश्चुम्बिताय नमः । (२.३८)
५२०. ॐ गोपगोवृन्दगोपालिकावल्लभाय नमः । (२.३८)
५२१. ॐ वल्लवीवृन्दवृन्दारकाय नमः । (२.३८)
५२२. ॐ मौलिमालामिलन्मत्तभृङ्गीलताभीतभीतप्रियाविभ्रमालिङ्गिताय नमः । (२.३९)
५२३. ॐ स्रस्तगोपीकुचाभोगसम्मेलिताय नमः । (२.३९)
५२४. ॐ चारुचामीकराभासभामाविभवे नमः । (२.४०)
५२५. ॐ वैजयन्तीलतावासितोरःस्थलाय नमः । (२.४०)
५२६. ॐ नन्दवृन्दावने वासिता मध्यगाय नमः । (२.४०)
५२७. ॐ बालिकातालिकाताललीलालयासङ्गसन्दर्शितभ्रूलताविभ्रमाय नमः । (२.४१)
५२८. ॐ गोपिकागीतदत्तावधानाय नमः । (२.४१)
५२९. ॐ पारिजातं समुद्धृत्य राधावयोरूपया मासभासा गुणैरङ्कणे स्थापिताय नमः । (२.४२)

५३०. ॐ शीतशीते वटे यामुनीतटे वेणुवादनं कृतवते नमः । (२.४२)
५३१. ॐ कलिन्दात्मजातीरतमालकाननतले गवां चक्रं चारयते नमः । (२.४३)
५३२. ॐ अव्याहतं पन्थानं दर्शयिष्यते नमः । (२.४३)
५३३. ॐ गोधूलिधूसरितकोमलगोपवेषाय नमः । (२.४४)
५३४. ॐ गोपालबालकशतैरनुगम्यमानाय नमः । (२.४४)
५३५. ॐ सायन्तने प्रतिगृहं पशुबन्धनार्थं गच्छते नमः । (२.४४)
५३६. ॐ अच्युतशिशवे नमः । (२.४४)
५३७. ॐ लावण्यानां निधये नमः । (२.४५)
५३८. ॐ निखिलजगदाश्चर्यनिलयाय नमः । (२.४५)
५३९. ॐ भासां निजावासाय नमः । (२.४५)
५४०. ॐ निरवधिकनिःश्रेयसरसाय नमः । (२.४५)
५४१. ॐ सुधाधारासाराय नमः । (२.४५)
५४२. ॐ मृगदृशां सुकृतपरिपाकाय नमः । (२.४५)
५४३. ॐ कृतधियां अधिदैवाय नमः । (२.४५)
५४४. ॐ प्रथममाङ्गल्याय नमः । (२.४५)
५४५. ॐ आताम्रपाणिकमलप्रणयप्रतोदाय नमः । (२.४६)
५४६. ॐ आलोलहारमणिकुण्डलहेमसूत्राय नमः । (२.४६)
५४७. ॐ आविःश्रमाम्बुकणाय नमः । (२.४६)
५४८. ॐ अम्बुदनीलवर्णाय नमः । (२.४६)
५४९. ॐ धनञ्जयरथाभरणाय नमः । (२.४६)
५५०. ॐ आद्याय महसे नमः । (२.४६)
५५१. ॐ विततगात्राय नमः । (२.४७)
५५२. ॐ तोत्रनिस्यूतमौलये नमः । (२.४७)
५५३. ॐ दशनविधृतरश्मये नमः । (२.४७)
५५४. ॐ पाण्डवस्यन्दनाश्वान् अञ्जलिस्थैः पयोभिरनुदिनं अभिषेकं कुर्वाणाय नमः । (२.४७)
५५५. ॐ देवकीपुण्यराशये नमः । (२.४७)
५५६. ॐ व्रजयुवतिसहायाय नमः । (२.४८)
५५७. ॐ यौवनोल्लासिकाय नमः । (२.४८)
५५८. ॐ सकलशुभविलासाय नमः । (२.४८)
५५९. ॐ कुन्दमन्दारहासाय नमः । (२.४८)
५६०. ॐ मुनिसरसिजभानवे नमः । (२.४८)

५६१. ॐ आर्द्रस्मितमधुरबिम्बाधरसुधासरण्या सङ्क्रान्तैः वेणुनिनदैः अरण्यानीं सपदि मदयते नमः । (२.४९)
५६२. ॐ धरण्या सानन्दोत्पुलकं उपगूढाङ्घ्रिकमलाय नमः । (२.४९)
५६३९९९९९शरण्यानां आद्याय नमः ।
५६४. ॐ मधुरिमाशरीरिणे नमः । (२.४९)
५६५. ॐ विदग्धगोपालविलासिनीनां सम्भोगचिह्नाङ्कितसर्वगात्राय नमः । (२.५०)
५६६. ॐ पवित्राय नमः । (२.५०)
५६७. ॐ आम्नायगिरां अगम्याय नमः । (२.५०)
५६८. ॐ ब्रह्मणे नमः । (२.५०)
५६९. ॐ अन्तर्गृहे चोरं कृष्णं अवेक्ष्य कवाटं बद्धा जननिं गतया एकया तत्रापि उलूखले दामनिबद्धं दृष्टाय नमः । (२.५१)
५७०. ॐ आत्मीयमुखारविन्दं सङ्क्रान्तमादातुकामः तदलाभखेदात् धात्रीवदनं विलोक्य रोयमानाय रत्नस्थले जानुचराय कुमाराय नमः । (२.५२)
५७१. ॐ यशोदया आनन्देन चिरं दृष्टाय नमः । (२.५३)
५७२. ॐ गोपङ्गनाभिः समदनं चिरं दृष्टाय नमः । (२.५३)
५७३. ॐ वलविद्विषा साशङ्कं दृष्टाय नमः । (२.५३)
५७४. ॐ सिद्धैः सकुसुमैः दृष्टाय नमः । (२.५३)
५७५. ॐ गोपकुमारकैः पृथुव्याकुलं सेर्ष्यं दृष्टाय नमः । (२.५३)
५७६. ॐ पौरैः सकुतुकं चिरं दृष्टाय नमः । (२.५३)
५७७. ॐ जनैः सस्मितं चिरं दृष्टाय नमः । (२.५३)
५७८. ॐ प्रोत्क्षिप्तगोवर्धनाय नमः । (२.५३)
५७९. ॐ मुररिपवे नमः । (२.५३)
५८०. ॐ पुराणाभिः आत्मविद्भिः परस्तात् गुहायां निहिताय परस्मै नमः । (२.५४)
५८१. ॐ यशोदाशिशुबालाय नमः । (२.५४)
५८२. ॐ मुरारिपादार्पितचित्तवृत्त्या दध्यादिकं विक्रेतुकामया गोपकन्यया मोहवशात् “गोविन्द, दामोदर, माधव” इति वाच्यमानाय नमः । (२.५५)
५८३. ॐ यस्य कलभस्य आलानं उलूखलं वा यमिनां मनो वा गोपाङ्गनानां कुचकुड्मलं वा त्रयमेव आसीत् तस्मै नमः । (२.५६)
५८४९९९९९मुरारिनाम्ने नमः ।
५८५. ॐ करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयते नमः । (२.५७)
५८६. ॐ वटस्य पत्रस्य पुटे शयानाय नमः । (२.५७)
५८७. ॐ बालाय मुकुन्दाय नमः । (२.५७)

५८८. ॐ “शम्भो स्वागतं, इतः आस्यतां, पद्मासन, इतः वामेन (आस्यतां)क्रौञ्चारे कुशलं?, सुरपते सुखं?, वित्तेश, नो दृश्यसे” इत्येवं जननीं श्राव्यमाणाय स्वप्नगताय नमः । (२.५८)
५८९. ॐ कैटभजिते नमः । (२.५८)
५९०. ॐ यदुनाथाय नमः । (२.५९)
५९१. ॐ “निशा अन्धकारोदये, तदा एव पातुं पयः ददामि“इति वक्तुं जननीं आमील्याक्षियुगं “निशा अपि उपगतं पयः पातुं देहि” इति वदते नमः । (२.५९)
५९२९९९९९मातुः वक्षोजाम्बरकर्षकाय नमः ।
५९३. ॐ हरेः “कर्बुरिका पयः पिब, ते शिखा वर्धिष्यते” इत्थं यशोदागिरः बालतया श्रुत्वा क्षीरं अर्धपीते स्वशिखं स्पृशन् प्रमुदिताय नमः । (२.६०)
५९४. ॐ स्मेरे प्रफुल्ले मुखे लसन् कैलासं नवनीतति मातरं दर्शयितवते नमः । (२.६१)
५९५. ॐ इयं क्षितिं प्राग्जग्धमृल्लोष्टति मातरं दर्शयितवते नमः । (२.६१)
५९६. ॐ क्षिरोदमपि निपीतदुग्धति मातरं दर्शयितवते नमः । (२.६१)
५९७. ॐ मात्रा अजीर्णधिया दृढं चकितया “वत्स धू धू चिरं जीव जीव” इत्युक्ताय नमः । (२.६१)
५९८. ॐ किञ्चित् कुञ्चितलोचनाय पर्यायपीतं स्तनं पीयमानाय नमः । (२.६२)
५९९. ॐ सद्यः प्रस्नुतदुग्धबिन्दुं अपरहस्तेन सम्मार्जते नमः । (२.६२)
६००. ॐ मात्रा चिबुके एकाङ्गुलिलालिताय नमः । (२.६२)
६०१. ॐ अधरे निपतिता क्षीरकणान्विता दन्तद्युतये नमः । (२.६२)
६०२. ॐ शौरये नमः । (२.६२)
६०३. ॐ विवाहोत्सवे लक्ष्म्याः उत्तुङ्गस्तनमण्डले परिलसत् प्रालम्बमुक्तामणेः अन्तः बिम्बिताय नमः । (२.६३)
६०४. ॐ इन्द्रनीलनिकरच्छायानुकारिद्युतिवपुषे नमः । (२.६३)
६०५. ॐ लज्जाव्याजं उपेत्य नम्रवदनया लक्ष्म्या मुदितं स्पष्टं पश्यते नमः । (२.६३)
६०६. ॐ यशोदया “व्यादेहि” इत्युक्ताय विदारिते शिशुमुखे जगत् समस्तं दर्शयन् मातरं विस्मयपदं गमयितवते नमः । (२.६४)
६०७. ॐ रोहिणी(नक्षत्रे)प्रसूताय गोपवधूकुचेषु कृतास्पदाय नीलरत्नाय नमः । (२.६५)
६०८. ॐ अत्यन्तविलोकनीयं नृत्यते नमः । (२.६६)
६०९. ॐ यं अग्रे मणिस्तम्भगतं निरीक्ष्य मृगाक्षिणा एकं नवनीतं द्विधा वितेने तस्मै नमः । (२.६६)
६१०. ॐ “वत्स जागृहि, विभातं आगतं, कृष्ण - शरदां शतं जीव” इत्युदीर्य सुचिरं यशोदया दृश्यमानवदनाय नमः । (२.६८)
६११. ॐ वल्लवीभिः शिशु इति धिया चुम्बिते (सति)ओष्टं जिघ्रते नमः । (२.६८)
६१२. ॐ वल्लवीभिः गाढं आलिङ्गिते (सति)कण्ठं गृह्णते नमः । (२.६८)

६१३. ॐ वल्लवीभिः आरोपिताङ्के (सति)दोष्णा अभिमृशते नमः । (२.६८)
६१४. ॐ बालकृष्णाय नमः । (२.६८)
६१५. ॐ दुरितहारिणे नमः । (२.६८)
६१६. ॐ व्याहृतपूर्वजन्मचरितं श्रुत्वा शङ्कितया राधया सेर्ष्यं वीक्षिताय नमः । (२.६९)
६१७. ॐ “ओष्ठं मुञ्च, भवता पानैः पूतना हता, कण्ठाश्लेषं जहीहि, आलिङ्गनेन अर्जुनौ दलितौ, छुरितं मा देहि, हिरण्यकशिपुः नखैः पञ्चतां नीतः” इत्यादि नर्मापहासोक्त्या लक्ष्म्या वारितरात्रिकेलये नमः । (२.७०)
६१८. ॐ निद्रार्थं जनन्योक्तं रामायणकथां शृण्वते रावणशब्दश्रवणे “सौमित्रे क्व धनुः, धनुः, धनुः” इति व्यग्रेणोक्तवते नमः । (२.७१)
६१९. ॐ बालोऽपि शैलोद्धरणाग्रपाणये नमः । (२.७२)
६२०. ॐ नीलोऽपि नीरन्ध्रतमप्रदीपाय नमः । (२.७२)
६२१. ॐ धीरोऽपि राधानयनावबद्धाय नमः । (२.७२)
६२२. ॐ जारोऽपि संसारहराय नमः । (२.७२)
६२३. ॐ बालाय नीलवपुषे नमः । (२.७३)
६२४. ॐ नवकिङ्किणीकजालाभिरामजघनाय नमः । (२.७३)
६२५. ॐ दिगम्बराय शार्दूलदिव्यनखभूषणभूषिताय  नमः । (२.७३)
६२६. ॐ नवनीतमुषे नमः । (२.७३)
६२७. ॐ नन्दात्मजाय नमः । (२.७३)
६२८. ॐ दक्षिणे पाणौ मुदा आहितरसं पायसभक्तं बिभ्रते नमः । (२.७४)
६२९. ॐ सव्ये (पाणौ)शारदचन्द्रमण्डलनिभं हैयङ्गवीनं दधानाय नमः । (२.७४)
६३०. ॐ कण्ठे उद्दामदीप्तं कल्पितपुण्डरीकनखमपि वहते नमः । (२.७४)
६३१. ॐ दिव्यदिगम्बराय नमः । (२.७४)
६३२. ॐ यशोदाशिशवे नमः । (२.७४)
६३३. ॐ सौख्यदायकाय नमः । (२.७४)
६३४. ॐ किङ्किणिकिणिकिणिरभसैः अङ्कणभुवि सदा रिङ्खणैः अटते नमः । (२.७५)
६३५. ॐ कुङ्कुणुकुणुपदयुगलाय नमः । (२.७५)
६३६. ॐ कङ्कणकरभूषणाय नमः । (२.७५)
६३७. ॐ सुरभीणां सम्बाधे अनुयान्तीं अम्बां आयासयते नमः । (२.७६)
६३८. ॐ लम्बालकाय नमः । (२.७६)
६३९. ॐ तनुविलग्नजम्बालाय बालाय नमः । (२.७६)
६४०. ॐ अञ्चितपिञ्छाचूडाय नमः । (२.७७)
६४१. ॐ सञ्चितसौजन्यवल्लवीवलयाय नमः । (२.७७)

६४२. ॐ अधरमणिनिहितवेणवे नमः । (२.७७)
६४३. ॐ प्रह्लादभागधेयाय नमः । (२.७८)
६४४. ॐ निगमगणमहागुहान्तराधेयाय नमः । (२.७८)
६४५. ॐ नरहरिपदाभिधेयाय नमः । (२.७८)
६४६. ॐ विबुधविधेयाय नमः । (२.७८)
६४७. ॐ संसारे सारं योऽस्ति तस्मै नमः । (२.७९)
६४८. ॐ कंसारेः चरणकमलाभ्यां नमः । (२.७९)
६४९. ॐ अन्धकारे ज्योतिः योऽस्ति तस्मै नमः । (२.७९)
६५०. ॐ अनुस्मरणीयाय अन्धकारये नमः । (२.७९)
६५१. ॐ कलशनवनीतचोराय नमः । (२.८०)
६५२. ॐ कमलादृक्कुमुदचन्द्रिकापूराय नमः । (२.८०)
६५३. ॐ गोपसुन्दरीजाराय नमः । (२.८०)
६५४. ॐ नन्दकुमाराय नमः । (२.८०)
६५५. ॐ बलानुजाय नमः । (२.८१)
६५६. ॐ गोपस्त्रिया “इह ते किं” पृच्छ्यमाने “मन्मन्दिरशङ्कया” इति प्रतिवचनं कृतवते नमः । (२.८१)
६५७. ॐ “नवनीतभाण्डविवरे किमर्थं हस्तं न्यसेः” इति पृच्छ्यमाने “कञ्चन वत्सकं मृगयितुं, विषादं मा अगाः” इत्युक्ताय नमः । (२.८१)
६५८. ॐ गोपालाजिरकर्दमे विहरते नमः । (२.८२)
६५९. ॐ विप्राध्वरे लज्जमानाय नमः । (२.८२)
६६०. ॐ गोकुलहुङ्कृतैः ब्रवीते नमः । (२.८२)
६६१. ॐ विदां स्तुतिशतैः मौनं विधानाय नमः । (२.८२)
६६२. ॐ गोकुलपुंश्चलीषु दास्यं कुर्वाणाय नमः । (२.८२)
६६३. ॐ दान्तात्मसु स्वाम्यं न कुर्वाणाय नमः । (२.८२)
६६४. ॐ मञ्जुलाङ्घ्रिपङ्कजयुगाय नमः । (२.८२)
६६५. ॐ यशोदायाः दायादाय नमः । (२.८३)
६६६. ॐ राधामुखाम्भोजं भोजं भोजं वर्धमानाय तेजसे नमः । (२.८३)
६६७. ॐ सरसिजनयनाय नमः । (२.८४)
६६८. ॐ सर्वतोभद्राय नमः । (२.८४)
६६९. ॐ अन्यावतारेष्वदृश्यमानप्रभवाय नमः । (२.८४)
६७०. ॐ गोगोपगोपिकामुक्त्यैः प्रभवते नमः । (२.८४)
६७१. ॐ नवघनश्यामाय नमः । (२.८५)

६७२. ॐ रणन्नूपुराय नमः । (२.८५)
६७३. ॐ फाले बालविभूषणाय नमः । (२.८५)
६७४. ॐ कटिरणत्सत्किङ्किणीमेखलाय नमः । (२.८५)
६७५. ॐ कण्ठे व्याघ्रनखाय नमः । (२.८५)
६७६. ॐ शैशवकलाकल्याणकार्त्स्न्याय नमः । (२.८५)
६७७. ॐ दर्शितोदारलीलाय नमः । (२.८६)
६७८. ॐ करतलधृतशैलाय नमः । (२.८६)
६७९. ॐ वेणुनादैः रसालाय नमः । (२.८६)
६८०. ॐ व्रजजनकुलपालाय नमः । (२.८६)
६८१. ॐ कामिनीकेलिलोलाय नमः । (२.८६)
६८२. ॐ कलितललितमालाय नमः । (२.८६)
६८३. ॐ स्मितललितकपोलाय नमः । (२.८७)
६८४. ॐ स्निग्धसङ्गीतलोलाय नमः । (२.८७)
६८५. ॐ ललितचिकुरजालाय नमः । (२.८७)
६८६. ॐ चारुचातुर्यशीलाय नमः । (२.८७)
६८७. ॐ शतमखरिपुकालाय नमः । (२.८७)
६८८. ॐ शातकुम्भाभचेलाय नमः । (२.८७)
६८९. ॐ कुवलयदलनीलाय नमः । (२.८७)
६९०. ॐ मुरलिनिनदलोलाय नमः । (२.८८)
६९१. ॐ मुग्धमायूरवालाय नमः । (२.८८)
६९२. ॐ दलितदनुजजालाय नमः । (२.८८)
६९३. ॐ धन्यसौजन्यशीलाय नमः । (२.८८)
६९४. ॐ परहितनवहेलाय नमः । (२.८८)
६९५. ॐ पद्मसत्मानुकूलाय नमः । (२.८८)
६९६. ॐ नवजलधरनीलाय नमः । (२.८८)
६९७. ॐ सरसगुणनिकायाय नमः । (२.८९)
६९८. ॐ सच्चिदानन्दकायाय नमः । (२.८९)
६९९. ॐ शमितसकलमायाय नमः । (२.८९)
७००. ॐ सत्यलक्ष्मीसहायाय नमः । (२.८९)
७०१. ॐ शमदमसमुदायाय नमः । (२.८९)
७०२. ॐ शान्तसर्वान्तराय नमः । (२.८९)
७०३. ॐ सहृदयजनदायाय नमः । (२.८९)

७०४. ॐ गोपालरायाय नमः । (२.८९)
७०५. ॐ लक्ष्मीकलत्राय नमः । (२.९०)
७०६. ॐ ललिताब्जनेत्राय नमः । (२.९०)
७०७. ॐ पूर्णेन्दुवक्त्राय नमः । (२.९०)
७०८. ॐ पुरुहूतमित्राय नमः । (२.९०)
७०९. ॐ कारुण्यपात्राय नमः । (२.९०)
७१०. ॐ कमनीयगात्राय नमः । (२.९०)
७११. ॐ यमुनामवतीर्य मदमयं उरगं दमयितवते नमः । (२.९१)
७१२९९९९९वीर्यशालिने नमः ।
७१३. ॐ यस्य मौलौ मायूरबर्हं, ललाटपट्टे चारु मृगमदतिलकं, कर्णद्वन्द्वे अतिमृदुलं तालीदलं, नासिकायां मौक्तिकं, उपकण्ठे कौस्तुभं मन्दारमालापरिमलभरितः हारः, पाणौ वेणुश्च तस्मै नमः । (२.९२)
७१४. ॐ व्रजयुवतियुताय नमः । (२.९२)
७१५. ॐ पीताम्बरधराय नमः । (२.९२)
७१६. ॐ मृगेक्षणानां वारिविहारकाले मुषितांशुकाय नमः । (२.९३)
७१७. ॐ गोपाङ्गनानां लसदसिततरालोललीलाकटाक्षाः यन्नासाचारुमुक्तामणिरुचिनिकरव्योमगङ्गाप्रवाहे मीनायन्ते तस्मै नमः । (२.९४)
७१८. ॐ गोपाङ्गनानां अतिरभसलसच्चारुनीलालकान्ताः यस्याङ्घ्रिद्वयसरसिरुहे भृङ्गायन्ते तस्मै नमः । (२.९४)
७१९. ॐ यद्वेणुश्रेणिरूपस्थितसुषिरमुखोद्गीर्णनादप्रभिन्नाः एणाक्ष्यः कामावेशप्रगल्भप्रकटितपुलकाः बभूवुः तस्मै नमः । (२.९५)
७२०. ॐ देवक्याः जठराकरे समुदिताय नमः । (२.९६)
७२१. ॐ गवां पालिना पुण्यात्मना नन्देन निजसुतापण्येन आनकदुन्दुभेः क्रीताय नमः । (२.९६)
७२२. ॐ गोपालावलिमुग्धहारतरलाय नमः । (२.९६)
७२३. ॐ गोपीजनालङ्कृताय नमः । (२.९६)
७२४. ॐ सुमधुराय इन्द्रनीलमणये नमः । (२.९६)
७२५. ॐ पीठेपीठनिषण्णबालकगले तिष्ठन् यन्त्रान्तःस्थितदुग्धभाण्डमपकृष्य घण्डारवं आच्छाद्य वक्त्रोपान्तकृताञ्जलिः कृतशिरःकम्पं पयः पीतवते नमः । (२.९७)
७२६. ॐ य आगतगोपिकानयनयोः गण्डूषफूल्कारकृत् तस्मै नमः । (२.९७)
७२७. ॐ गोपालकाय नमः । (२.९७)
७२८. ॐ चाणूरद्विषे नमः । (२.९८)
७२९. ॐ भक्तकल्मषमुषे नमः । (२.९८)

७३०. ॐ श्रीजुषे नमः । (२.९८)
७३१. ॐ भवद्वेषिणे नमः । (२.९८)
७३२. ॐ भक्त्या सुलभाय नमः । (२.९८)
७३३. ॐ “त्वयि प्रसन्ने मयि गुणेन किं, त्वय्यप्रसन्ने मयि गुणेन किं” इति यस्मिन् भक्तिं विना गुणाः निरर्थकाः तस्मै नमः । (२.९९)
७३४. ॐ गोकुले गोपाङ्गनाः क्षणदावसानसमये निजन्तकान्तिनिवहैः इन्दुप्रभां रुन्धन्त्यः पाणिकङ्कणझणत्कारानुकाराः व्यावद्गद्वसनाञ्चलाः जवाद् दधि मथ्नन्त्यः यं गायन्ति तस्मै नमः । (२.१००)
७३५. ॐ अंसालम्बितवामकुण्डलभराय नमः । (२.१०१)
७३६. ॐ मन्दोन्नतभ्रूलताय नमः । (२.१०१)
७३७. ॐ किञ्चित् कुञ्चितकोमलाधरपुटाय नमः । (२.१०१)
७३८. ॐ साचिप्रचारेक्षणाय नमः । (२.१०१)
७३९. ॐ आलोलाङ्गुलिपल्लवैः मुदा मुरलिकां आपूरयते नमः । (२.१०१)
७४०. ॐ कल्पतरोः मूले स्थिताय त्रिभङ्गिललिताय नमः । (२.१०१)
७४१. ॐ जगन्मोहनाय नमः । (२.१०१)
७४२. ॐ मल्लैः शैलेन्द्रकल्पः, अङ्गनाभिः पुष्पचापः, गोपैः तु प्राकृतात्मा, दिवि कुलिशभृता अप्रमेयः विश्वकायः, भयचकितदृशा कंसेन क्रुद्धः कालः, योगिभिः ध्येयमूर्तिः, इतरजनैः शिशुः इव रङ्गद्वारे दृष्टाय नमः । (२.१०२)
७४३. ॐ अमरगणानन्दकृते नमः । (२.१०२)
७४४. ॐ मणिविष्टरे संविष्टाय नमः । (२.१०३)
७४५. ॐ अङ्कतलमध्यासीनलक्ष्मीमुखे कस्तूरीतिलकं मुदा विरचयते नमः । (२.१०३)
७४६. ॐ लक्ष्मीकुचौ संस्पृशन् हर्षात् अन्योन्यस्मितचन्द्रिकाकिसलयैः मन्मथं आराधयते नमः । (२.१०३)
७४७. ॐ गोपीगोपपरीवृताय नमः । (२.१०३)
७४८. ॐ यदुपतये नमः । (२.१०३)
७४९. ॐ “बालः कश्चन चूतपल्लवः, इति प्रान्तस्मितास्यश्रियं नतमुखीं रुक्मिणीं श्लिष्टवते नमः । (२.१०४)
७५०. ॐ उर्व्यां लघुतरः कोऽपि महीधरः लीलया दोर्भ्यां धृतः तेन यो दिवि भूतले च गोवर्धनो गीयते तस्मै नमः । (२.१०५)
७५१. ॐ त्रैलोक्यधराय नमः । (२.१०५)
७५२. ॐ यादवकुलोत्तंसाय नमः । (२.१०६)
७५३. ॐ कंसद्विषे नमः । (२.१०६)

७५४. ॐ कृपाजलनिधये नमः । (२.१०७)
७५५. ॐ सिन्धुकन्यापतये नमः । (२.१०७)
७५६. ॐ कंसान्तकाय नमः । (२.१०७)
७५७. ॐ गजेन्द्रकरुणापारीणाय नमः । (२.१०७)
७५८. ॐ रामानुजाय नमः । (२.१०७)
७५९. ॐ जगत्त्रयगुरवे नमः । (२.१०७)
७६०. ॐ पुण्डरीकाक्षाय नमः । (२.१०७)
७६१. ॐ गोपीजननाथाय नमः । (२.१०७)
७६२. ॐ यो ललाटफलके कस्तूरीतिलकं, वक्षस्थले कौस्तुभं, नासाग्रे नवमौक्तिकं, करतले वेणुं, करे कङ्कणं, सर्वाङ्गे हरिचन्दनं, कण्ठे मुक्तावलिञ्च कलयते तस्मै नमः । (२.१०८)
७६३. ॐ गोपस्त्रीपरिवेष्टिताय नमः । (२.१०८)
७६४. ॐ गोपालचूडामणये नमः । (२.१०८)
७६५. ॐ लोकान् उन्मदयन्, श्रुतीर्मुखरयन्, क्षोणिरुहान् हर्षयन्, शैलान् विद्रवयन्, मृगान् विवशयन्, गोवृन्दमानन्दयन्, गोपान् सम्भ्रमयन्, मुनीन् मुकुलयन्, सप्तस्वरान् जृम्भयन्, ओम्कारार्थमुदीरयन् वंशीनिनादं कुर्वाणाय शिशवे नमः । (२.१०९)

## तृतीयसर्गः

७६६. ॐ समस्तजगतां स्वस्त्ययनाय नमः । (३.१)
७६७. ॐ अभ्यस्तलक्ष्मीस्तनाय नमः । (३.१)
७६८. ॐ ध्वस्तरजस्तमोभिः अनिशं पुरस्तात् न्यस्तं इव स्थिताय नमः । (३.१)
७६९. ॐ हस्तोदस्तगिरीन्द्रमस्तकतरुप्रस्तारविस्तारितस्रस्तस्वस्तरुसूनसंस्तरलसत्प्रस्ताविराधास्तुताय वस्तवे नमः । (३.१)
७७०. ॐ राधाराधितविभ्रमाद्भुतरसाय नमः । (३.२)
७७१. ॐ लालित्यरत्नाकराय नमः । (३.२)
७७२. ॐ साधारण्यपदव्यतीतसहजस्मेराननाम्भोरुहाय नमः । (३.२)
७७३. ॐ हरिनीलगर्वगुरुतासर्वस्वनिर्वापणाय नमः । (३.२)
७७४. ॐ मूर्धाभिषिक्ताय विमुग्धमधुराय नमः । (३.२)
७७५. ॐ वैणविकाय महसे बालाय नमः । (३.२)
७७६. ॐ करिणां अलभ्यगतिवैभवाय नमः । (३.३)
७७७. ॐ करुणावलम्बितकिशोरविग्रहाय नमः । (३.३)
७७८. ॐ यमिनां मानसे अनारतविहारिणे नमः । (३.३)

७७९. ॐ यमुनावनान्तररसिकाय नमः । (३.३)
७८०. ॐ परस्मै महसे नमः । (३.३)
७८१. ॐ विपुलविलोचनाज्ञया सकलजगन्नियन्त्रकाय नमः । (३.४)
७८२. ॐ व्रजाङ्गनानियन्त्रिताय नमः । (३.४)
७८३. ॐ समन्ततः सरसतराय नमः । (३.४)
७८४. ॐ हृदये निरन्तरं विजृम्भमाणाय परस्मै महसे नमः । (३.४)
७८५. ॐ कन्दर्पप्रतिमल्लकान्तिविभवाय नमः । (३.५)
७८६. ॐ कादम्बिनीबान्धववर्णाय नमः । (३.५)
७८७. ॐ वृन्दारण्यविलासिनीव्यसनिनाय नमः । (३.५)
७८८. ॐ वेषेण भूषामयाय नमः । (३.५)
७८९. ॐ मन्दस्मेरमुखाम्बुजाय नमः । (३.५)
७९०. ॐ मधुरिमव्यामृष्टबिम्बाधराय नमः । (३.५)
७९१. ॐ कन्दलितार्द्रयौवनवनाय कैशोरकाय नमः । (३.५)
७९२. ॐ शार्ङ्गिणे नमः । (३.५)
७९३. ॐ आमुक्तमानुषाय नमः । (३.६)
७९४. ॐ अमुक्तनिजानुभावाय नमः । (३.६)
७९५. ॐ आरूढविग्रहाय नमः । (३.६)
७९६. ॐ अगूढविदग्धलीलाय नमः । (३.६)
७९७. ॐ आमृष्टयौवनाय नमः । (३.६)
७९८. ॐ अनष्टकिशोरभावाय नमः । (३.६)
७९९. ॐ मानसे माद्यते आद्याय किमपि महसे नमः । (३.६)
८००. ॐ सकलजगतीलोभनीयप्रभावाय नमः । (३.७)
८०१. ॐ वीणावेणुक्वणितलसितस्मेरवक्त्रारविन्दाय नमः । (३.७)
८०२. ॐ नन्दपुण्याम्बुराशये नमः । (३.७)
८०३. ॐ अज्ञातापरमधुराय नमः । (३.७)
८०४. ॐ सुकृतिभिः आदृताय नमः । (३.८)
८०५. ॐ सरसवेणुनिनादसुधारसलहरीविहारनिरवग्रहकर्णपुटाय नमः । (३.८)
८०६. ॐ व्रजवरसुन्दरीमुखसरोरुहसन्मधुपाय नमः । (३.८)
८०७. ॐ कारुण्यकटाक्षकेल्या मोहमहान्धकारमुष्काय नमः । (३.९)
८०८. ॐ पुण्यदयैकसिन्धवे नमः । (३.९)
८०९. ॐ निखिलनिगममौलिलालिताय नमः । (३.१०)
८१०. ॐ परमस्य तेजसः व्रजभुवि सरसकरीषविशेषरूषितपदकमलाभ्यां नमः । (३.१०)

८११. ॐ उदारमृदुलस्मितव्यतिकराभिरामाननाय नमः । (३.११)
८१२. ॐ मुहुः उदीर्णया मुदा मुनि मनोम्बुजाम्रेडिताय नमः । (३.११)
८१३. ॐ मदालसविलोचनव्रजवधूमदास्वादिताय नमः । (३.११)
८१४. ॐ व्रजजनमद्योषिल्लोचनोच्छिष्ट शेषीकृताय नमः । (३.१२)
८१५. ॐ कुवलयदलनीलाय कान्तिपूराय नमः । (३.१२)
८१६. ॐ घोषयोषिदनुगीतयौवनाय नमः । (३.१३)
८१७. ॐ कोमलस्वनितवेणुनिस्वनाय नमः । (३.१३)
८१८. ॐ अभिरामसम्पदां सारभूताय नमः । (३.१३)
८१९. ॐ तामरसलोचनाय नमः । (३.१३)
८२०. ॐ ललितया लीलया अवलम्बिताय नमः । (३.१४)
८२१. ॐ मूर्तिसम्पदां मूलगेहमिव स्थिताय नमः । (३.१४)
८२२. ॐ नीलनीरदविलासविभ्रमाय नमः । (३.१४)
८२३. ॐ दयादर्शितशैशवाय नमः । (३.१५)
८२४. ॐ वन्दारुवृन्दारकवृन्दमौलिमालाविनिमर्दचारु चरणारविन्दद्वन्द्वाय नमः । (३.१५)
८२५. ॐ यस्मिन् क्रौञ्चद्विषः चन्द्रकी यस्य शेखरभरैः नृत्यति तस्मै नमः । (३.१६)
८२६. ॐ धूर्जटेः वृषः यस्य घोषसुरभिं जिघ्रन् दृप्यति तस्मै नमः । (३.१६)
८२७. ॐ हरेः सिन्धुरः यस्य विभ्रमगतिं वाञ्छन् सज्जति तस्मै नमः । (३.१६)
८२८. ॐ वृन्दावनकल्पकद्रुमवनवासिने नमः । (३.१६)
८२९. ॐ अरुणाधरामृतविशेषितस्मिताय नमः । (३.१७)
८३०. ॐ वरुणालयानुगतवर्णवैभवाय नमः । (३.१७)
८३१. ॐ तरुणारविन्ददलदीर्घलोचनाय नमः । (३.१७)
८३२. ॐ करुणालयाय नमः । (३.१७)
८३३. ॐ लावण्यवीचिरचिताङ्गभूषाय नमः । (३.१८)
८३४. ॐ भूषापदारोपितपुण्यबर्हाय नमः । (३.१८)
८३५. ॐ कारुण्यधारालकटाक्षमालायै नमः । (३.१८)
८३६. ॐ वल्लववंशलक्ष्म्यै नमः । (३.१८)
८३७. ॐ मथुरावीथिचराय नमः । (३.१९)
८३८. ॐ नगरीमृगशाबलोचनानयनेन्दीवरवर्षहर्षिताय नमः । (३.१९)
८३९. ॐ मधुरैकरसवपुषे नमः । (३.१९)
८४०. ॐ पर्याकुलेन नयनान्तविजृम्भितेन कोमलमृदुस्मितविभ्रमेण मञ्जुलतरेण वक्रेण मन्देन जल्पितेन च हृदयं धुनुते नमः । (३.२०)
८४१. ॐ नन्दस्य तनयाय नमः । (३.२०)

८४२. ॐ कन्दर्पकण्डूलकटाक्षवीचीः इन्दीवराक्षीः अभिलक्षमाणान् मन्दस्मिताधारमुखारविन्दाय नमः । (३.२१)
८४३. ॐ वल्लवधूर्तपादाभ्यां नमः । (३.२१)
८४४. ॐ राधालोचनलालिताय नमः । (३.२२)
८४५. ॐ लीलाटोपकटाक्षनिर्भरपरिष्वङ्गप्रसङ्गाधिकप्रीताय नमः । (३.२२)
८४६. ॐ गीतिविभङ्गसङ्गतलसद्वेणुप्रणादामृताय नमः । (३.२२)
८४७. ॐ ललितस्मेराय नमः । (३.२२)
८४८. ॐ माधुर्यैकरसाय मुखेन्दुकमलाय नमः । (३.२२)
८४९. ॐ शरणागतवज्रपञ्जराय नमः । (३.२३)
८५०. ॐ कृपया धृतगोपविग्रहाय नमः । (३.२३)
८५१. ॐ शार्ङ्गधराय नमः । (३.२३)
८५२. ॐ जगत्रैकान्तमनोज्ञभूम्यै नमः । (३.२४)
८५३. ॐ रमासमास्वादितसौकुमार्याय नमः । (३.२४)
८५४. ॐ राधास्तनाभोगरसज्ञाय नमः । (३.२४)
८५५. ॐ चेतसि अजस्रं सन्निधानाय ओजसे नमः । (३.२४)
८५६. ॐ करुणाकराय नमः । (३.२५)
८५७. ॐ वत्सपालचराय नमः । (३.२६)
८५८. ॐ श्रीवत्सलाञ्छनाय नमः । (३.२६)
८५९. ॐ मधुरिमभरिताय नमः । (३.२७)
८६०. ॐ मनोभिरामाय नमः । (३.२७)
८६१. ॐ मृदुलतरस्मितमुद्रिताननेन्दवे नमः । (३.२७)
८६२. ॐ त्रिभुवननयनैकलोभनीयाय नमः । (३.२७)
८६३. ॐ व्रजभाजि महसे नमः । (३.२७)
८६४. ॐ मकरन्दबिन्दुनिष्यन्दलीलामुरलीनिनादाय नमः । (३.२८)
८६५. ॐ व्रजाङ्गनापाङ्गतरङ्गभृङ्गसङ्ग्रामभूमिमुखारविन्दाय नमः । (३.२८)
८६६. ॐ आताम्रायतलोचनांशुलहरीलीलासुधाप्यायितैः गिताम्रेडितदिव्यकेलिभरितैः व्रजस्त्रीजनैः स्फीताय महसे नमः । (३.२९)
८६७. ॐ स्वेदाम्भःकणभूषितेन स्मेरेण वक्रेन्दुना उपलक्षिताय पादाम्भोजमृदुप्रचारसुभगाय महसे नमः । (३.२९)
८६८. ॐ पाणौ वेणुधराय नमः । (३.३०)
८६९. ॐ प्रकृतिसुकुमाराकृतये बाल्यलक्ष्म्यै नमः । (३.३०)
८७०. ॐ पार्श्वे प्रणयसरसालोकितापाङ्गालीलाः बालाः समेताय नमः । (३.३०)

८७१. ॐ मौलौ बर्हं मधुरवदनाम्भोरुहे मौग्ध्यमुद्रा इत्याद्राकाराय नमः । (३.३०)
८७२. ॐ आरूढवेणुमरुणाधरविभ्रमेण माधुर्यशालिवदनाम्बुजमुद्वहते नमः । (३.३१)
८७३. ॐ कैशोरके वयसि स्थिताय कापि च कान्तियष्टये नमः । (३.३१)
८७४. ॐ अनन्यसाधारणकान्तिकान्ताय नमः । (३.३२)
८७५. ॐ आक्रान्तगोपीनयनारविन्दाय नमः । (३.३२)
८७६. ॐ पुराणस्य पुंसः नवविलासाय नमः । (३.३२)
८७७. ॐ पुण्येन पूर्णेन दृश्यमानाय नमः । (३.३२)
८७८. ॐ मन्दस्मितार्द्रमधुराननचन्द्रबिम्बाय नमः । (३.३३)
८७९. ॐ नन्दस्य पुण्यनिचयाय नमः । (३.३३)
८८०. ॐ नीलाय बालाय नमः । (३.३४)
८८१. ॐ निसर्गसरसाधराय नमः । (३.३५)
८८२. ॐ निजदयार्द्रदिव्येक्षणाय नमः । (३.३५)
८८३. ॐ मनोज्ञमुखपङ्कजाय नमः । (३.३५)
८८४. ॐ मधुरसार्द्रमन्दस्मिताय नमः । (३.३५)
८८५. ॐ रसज्ञहृदयास्पदाय नमः । (३.३५)
८८६. ॐ रमितवल्लवीलोचनाय नमः । (३.३५)
८८७. ॐ भुवनलोभनीयाय महसे नमः । (३.३५)
८८८. ॐ सरसीरुहाक्षाय नमः । (३.३६)
८८९. ॐ वल्लवीस्तनद्वयीदुर्ललिताय नमः । (३.३७)
८९०. ॐ शनैः शनैः श्रावितवेणुनिःस्वनाय नमः । (३.३७)
८९१. ॐ विलासवेषाय नमः । (३.३७)
८९२. ॐ वचसां अतिभूम्यै अभूम्यै एव वा महसे नमः । (३.३८)
८९३. ॐ वासितवल्लवीस्तनाय महसे नमः । (३.३८)
८९४. ॐ मनसां अपररसायनाय नमः । (३.३८)
८९५. ॐ मधुराद्वैताय महसे नमः । (३.३८)
८९६. ॐ जगदेकमण्डनाय नमः । (३.३९)
८९७. ॐ कमलायतेक्षणाय नमः । (३.३९)
८९८. ॐ व्रजसुन्दरीजनविलोचनामृताय नमः । (३.३९)
८९९. ॐ कमनीयधाम्ने नमः । (३.३९)
९००. ॐ मुनिश्रेणीवन्द्याय नमः । (३.४०)
९०१. ॐ मदभरलसद्वल्लववधूस्तनश्रोणीबिम्बस्तिमितनयनाम्भोजसुभगाय नमः । (३.४०)
९०२. ॐ पुलकितगिरा नैगमगिरा पुनःश्लाघिताय नमः । (३.४०)

९०३. ॐ घनश्यामाय नमः । (३.४०)
९०४. ॐ महनीयाकृतये नमः । (३.४०)
९०५. ॐ मनुजाकृतये विभवे नमः । (३.४१)
९०६. ॐ मधुरिमश्रियै नमः । (३.४१)
९०७. ॐ कृशोदरीदृशां विशेषदृश्येन किशोरवेषेण उपलक्षिताय नमः । (३.४२)
९०८. ॐ विशाललोचनाय नमः । (३.४२)
९०९. ॐ यशोदयाऽऽलब्धयशोनवाम्बुधये नमः । (३.४२)
९१०. ॐ नीलनिशाकराय नमः । (३.४२)
९११. ॐ विलासलक्ष्म्याः प्रकृत्यै नमः । (३.४३)
९१२. ॐ प्रणतापराधवीथ्यां प्रकृतिजडाय नमः । (३.४३)
९१३. ॐ सुकृति किशोरभावे कृतपदाय नमः । (३.४३)
९१४. ॐ सुकृतिमनःप्रणिधानपात्राय नमः । (३.४३)
९१५. ॐ अपहसितसुधामदावलेपैः आर्द्रमन्दहासैः अतिसुमनोहराय नमः । (३.४४)
९१६. ॐ व्रजयुवतिविलोचनावलेह्याय नमः । (३.४४)
९१७. ॐ रमावरोधनधाम्ने नमः । (३.४४)
९१८. ॐ अङ्कुरितस्मेरदशाविशेषैरक्षणामश्रान्तहर्षामृतवर्षाय नमः । (३.४५)
९१९. ॐ गोपकन्याधन्यस्तनस्वस्त्ययनाय नमः । (३.४५)
९२०. ॐ व्रजगोपवधूस्तनकलशस्थलीघुसृणमर्दनकर्दमित मृगमदपङ्कसङ्करविशेषितवन्घमहागिरितटगण
नमः । (३.४६)
९२१. ॐ अजिताय नमः । (३.४६)
९२२. ॐ आमूलपल्लवितलीलमपाङ्गजालैः भुवनं आसिञ्चते नमः । (३.४७)
९२३. ॐ आदृतगोपवेषाय बालाकृतये नमः । (३.४७)
९२४. ॐ मृदुलमुग्धमुखेन्दुबिम्बाय नमः । (३.४७)
९२५. ॐ मधुद्विषे नमः । (३.४७)
९२६. ॐ माधुर्यसिद्धये नमः । (३.४७)
९२७. ॐ व्रजे विरणन्मणिनूपुरचरणाम्भोजाय नमः । (३.४८)
९२८. ॐ अशरणानां शरणाय नमः । (३.४९)
९२९. ॐ शारदाम्भोजनेत्राय नमः । (३.४९)
९३०. ॐ निरवधि मधुरिम्णा नीलवेषेण रम्याय नमः । (३.४९)
९३१. ॐ स्मरशरपरतन्त्रस्मेरनेत्राम्बुजाभिः व्रजयुवतिभिः संवेष्टिताय नमः । (३.४९)
९३२. ॐ सुव्यक्तकान्तिभरसौरभदिव्यगात्राय नमः । (३.५०)
९३३. ॐ अव्यक्तयौवनपरीतकिशोरभावाय नमः । (३.५०)

९३४. ॐ गव्यानुपालनविधौ अनुशिष्टाय नमः । (३.५०)
९३५. ॐ अव्याजरम्याय नमः । (३.५०)
९३६. ॐ अखिलेश्वरवैभवाय नमः । (३.५०)
९३७. ॐ अम्बरालम्बिनीनां अमरीणां नयनमधुरिमश्रीनर्मनिर्माणसीम्ना अनुगताय नमः । (३.५१)
९३८. ॐ व्रजयुवतिविलासव्यापृताङ्गाय नमः । (३.५१)
९३९. ॐ त्रिभुवनसुकुमाराय नमः । (३.५१)
९४०. ॐ दिव्यकैशोरकाय नमः । (३.५१)
९४१. ॐ आपादमाचूडमतिप्रसक्तैः यमिनां मनोभिः आपीयमानाय नमः । (३.५२)
९४२. ॐ गोपीजनज्ञातरसाय नमः । (३.५२)
९४३. ॐ गोपालभूपालकुमारमूर्तये नमः । (३.५२)
९४४. ॐ विप्रयोगाकुलानां वृन्दावनमृगदृशां दिष्ट्या प्रणयचपलापाङ्गवीचितरङ्गैः प्रत्यासन्नाय नमः । (३.५३)
९४५. ॐ लक्ष्मीलीलाकुवलयदलश्यामलाय नमः । (३.५३)
९४६. ॐ पुलकमुकुलाभोगभूषाविशेषाय धाम्ने नमः । (३.५३)
९४७. ॐ गुहशिखीन्द्रपिञ्छमौलये नमः । (३.५४)
९४८. ॐ सुरगिरिगैरिककल्पिताङ्गरागाय नमः । (३.५४)
९४९. ॐ सुरयुवतिविकीर्णसूनवर्षस्नपितविभूषितकुन्तलाय नमः । (३.५४)
९५०. ॐ अङ्गजवेल्लितमधुरमन्दशुचिस्मितमञ्जुलव्रजबालवधूजनस्तनतटीविलुठन्नयनावदनपङ्कजाय नमः । (३.५५)
९५१. ॐ अलसविलसन्मुग्धस्निग्धस्मिताय नमः । (३.५६)
९५२. ॐ व्रजसुन्दरीमदनकदनस्विन्नधन्यवदनाम्बुजं वहते तरुणाय नमः । (३.५६)
९५३. ॐ अरुणज्योत्स्नाकृत्स्नस्मितस्नपिताधराय नमः । (३.५६)
९५४. ॐ एणीदृशां विजयश्रेणीं मदयते महसे नमः । (३.५६)
९५५. ॐ क्रीडान्तप्रतिसुप्तदुग्धतनयामुग्धावबोधक्षणत्रासारूढोपगूहनमहासाम्राज्यसान्द्रश्रियै नमः । (३.५७)
९५६. ॐ त्रिभुवनस्वादीयसे नमः । (३.५७)
९५७. ॐ स्मितस्नुतसुधाधराय नमः । (३.५८)
९५८. ॐ मदशिखण्डिबर्हाङ्कितायं नमः । (३.५८)
९५९. ॐ विशालनयनाम्बुजाय नमः । (३.५८)
९६०. ॐ मधुरवेणुनादद्रवाय नमः । (३.५८)
९६१. ॐ व्रजविलासिनीवासिताय नमः । (३.५८)

९६२. ॐ चिरं चेतसा उपासिताय नमः । (३.५८)
९६३. ॐ शिखिशिखण्डकृतावतंसाय नमः । (३.५९)
९६४. ॐ सरसकान्तिसुधासमृद्धये नमः । (३.५९)
९६५. ॐ यस्य सरसकान्तिसुधाबिन्दुलेश-कणिकापरिमाणभाग्यात् पञ्चबाणः सौभाग्यसीमपदं अञ्चति तस्मै नमः । (३.५९)
९६६. ॐ आर्द्रस्मितच्छायाधर्षित-शारदेन्दुललिताय नमः । (३.६०)
९६७. ॐ आयामेन अक्षय्याय विशालतरदृशे नमः । (३.६०)
९६८. ॐ रसिकैः अपरान् आयासान् विधूय मुहुः आस्वाद्यमानाय नमः । (३.६०)
९६९. ॐ उन्मदवल्लवीकुचभराधाराय किशोरमहसे नमः । (३.६०)
९७०. ॐ यस्य स्वाङ्गनाः गोपाङ्गनाः, स्कन्दालम्बि तु वत्सदाम, धनदाः सहायादयः गोपाः, शृङ्गाराः गिरिगैरिकं श्रीमन्ति बर्हाणि वा, तथापि यं त्रिलोकेश्वरं प्राहु तस्मै नमः । (३.६१)
९७१. ॐ त्रिलोकेश्वराय नमः । (३.६२)
९७२. ॐ श्रीमद्बर्हिशिखण्डमण्डनजुषे नमः । (३.६२)
९७३. ॐ श्यामाभिरामत्विषे नमः । (३.६२)
९७४. ॐ लावण्यैकरसावसिक्तवपुषे नमः । (३.६२)
९७५. ॐ लक्ष्मीसरःप्रावृषे नमः । (३.६२)
९७६. ॐ लीलाकृष्टरसज्ञभक्तमनसे नमः । (३.६२)
९७७. ॐ लीलामृतस्रोतसे नमः । (३.६२)
९७८. ॐ गोपीजनप्रेयसे नमः । (३.६२)
९७९. ॐ आपाटलाधराय नमः । (३.६३)
९८०. ॐ अधीरविलोलनेत्राय नमः । (३.६३)
९८१. ॐ आमोदनिर्भरिताय नमः । (३.६३)
९८२. ॐ अद्भुतकान्तिपूराय नमः । (३.६३)
९८३. ॐ आविःस्मितामृताय नमः । (३.६३)
९८४. ॐ अनुस्मृतिलोभनीयाय नमः । (३.६३)
९८५. ॐ आमुद्रितानननाय मधुराननाय नमः । (३.६३)
९८६. ॐ पुरः स्थिताय पूर्णनिर्वाणाय नमः । (३.६४)
९८७. ॐ चरणयोः अरुणाय नमः । (३.६५)
९८८. ॐ कचभरे बहुलाय नमः । (३.६५)
९८९. ॐ करुणार्द्रयोः दृशोः विपुलाय नमः । (३.६५)
९९०. ॐ अञ्जनमेचके वपुषि मञ्जुलाय नमः । (३.६५)
९९१. ॐ वयसि बालाय मधुरमहसे नमः । (३.६५)

९९२. ॐ मालाबर्हमनोज्ञकुन्तलभराय नमः । (३.६६)
९९३. ॐ वन्यप्रसूनोक्षिताय नमः । (३.६६)
९९४. ॐ शैलेयद्रवक्लृप्तचित्रतिलकाय नमः । (३.६६)
९९५. ॐ शश्वन्मनोहारिणीं लीलावेणूरवामृतैकरसिकाय नमः । (३.६६)
९९६. ॐ लावण्यलक्ष्मीमयीबालतमालनीलवपुषे नमः । (३.६६)
९९७. ॐ परस्मै देवताय नमः । (३.६६)
९९८. ॐ पदे गुरुमृदवे नमः । (३.६७)
९९९. ॐ गुल्फे गूढाय नमः । (३.६७)
१०००. ॐ जघनस्थले घनाय नमः । (३.६७)
१००१. ॐ उदरे नलिनाय नमः । (३.६७)
१००२. ॐ बाह्वोः दीर्घाय नमः । (३.६७)
१००३. ॐ उरःस्थले विशालाय नमः । (३.६७)
१००४. ॐ अधरे मधुराय नमः । (३.६७)
१००५. ॐ वक्त्रे मुग्धाय नमः । (३.६७)
१००६. ॐ विलोचने विलासिने नमः । (३.६७)
१००७. ॐ कचभरे बहवे नमः । (३.६७)
१००८. ॐ वेषे वन्याय नमः । (३.६७)
१००९. ॐ मनोज्ञमहसे नमः । (३.६७)
१०१०. ॐ सुजानेन मौग्ध्यं जिहानाय जिहानाय नमः । (३.६८)
१०११. ॐ वेणुनादैः सुधां दुहानाय दुहानाय नमः । (३.६८)
१०१२. ॐ सुदीर्घैः अपाङ्गैः लिहानाय लिहानाय नमः । (३.६८)
१०१३. ॐ एकस्मै महानन्दसर्वस्वाय नमः । (३.६८)
१०१४. ॐ लसद्बर्हापीडाय नमः । (३.६९)
१०१५. ॐ ललितललितस्मेरवदनाय नमः । (३.६९)
१०१६. ॐ भ्रमद्क्रीडापाङ्गाय नमः । (३.६९)
१०१७. ॐ प्रणतजनतानिर्वृतिपदाय नमः । (३.६९)
१०१८. ॐ नवाम्भोदश्यामाय नमह् (३.६९)
१०१९. ॐ निजमधुरिमाभोगभरिताय नमः । (३.६९)
१०२०. ॐ परिमिलितकैशोरकरसाय नमः । (३.६९)
१०२१. ॐ आननेन सारस्य सामग्र्यमिव दृश्यमानाय नमः । (३.७०)
१०२२. ॐ स्मितेन माधुर्यचातुर्यमिव दृश्यमानाय नमः । (३.७०)
१०२३. ॐ ईक्षितेन कारुण्यतारुण्यमिव दृश्यमानाय नमः । (३.७०)

१०२४. ॐ दृशोः चापल्यसाफल्याय नमः । (३.७०)
१०२५. ॐ यस्मिन् यदि विश्वसितः निर्वाणमपि दुर्वारं तस्मै नमः । (३.७१)
१०२६. ॐ रागान्धगोपीजनवन्दिताभ्यां पदाभ्यां नमः । (३.७२)
१०२७. ॐ योगीन्द्रभृङ्गेन्द्रनिषेविताभ्यां पदाभ्यां नमः । (३.७२)
१०२८. ॐ आताम्रपङ्केरुहविभ्रमाभ्यां पदाभ्यां नमः । (३.७२)
१०२९. ॐ व्रजसुन्दरीणां सरस्वतीनां अकृत्रिमाणां (सरस्वतीनां)च अर्थानुलापान् आर्द्राशयेन श्रवणाञ्चलेन सम्भावयते तरुणाय नमः । (३.७३)
१०३०. ॐ मधुरमुखाय नमः । (३.७४)
१०३१. ॐ मन्थरापाङ्गाय नमः । (३.७४)
१०३२. ॐ करकलिततललितवंशाय नमः । (३.७४)
१०३३. ॐ मनसि सन्निधानाय कापि कृपालहरये नमः । (३.७४)
१०३४. ॐ शिक्षितपाशुपाल्याः बालावृताय नमः । (३.७५)
१०३५. ॐ बर्हिशिखावतंसाय नमः । (३.७५)
१०३६. ॐ प्राणप्रियप्रस्तुतवेणुगीताय नमः । (३.७५)
१०३७. ॐ शीतलगोपकन्याः शीतादृशे नमः । (३.७५)
१०३८. ॐ स्मितस्तबकिताधराय नमः । (३.७६)
१०३९. ॐ शिशिरवेणुनादामृताय नमः । (३.७६)
१०४०. ॐ मुहुस्तरललोचनाय नमः । (३.७६)
१०४१. ॐ मदकटाक्षमालाकुलाय नमः । (३.७६)
१०४२. ॐ उरस्तलविलीनया कमलया समालिङ्गिताय नमः । (३.७६)
१०४३. ॐ भुवः तलं उपागताय भुवनदैवताय नमः । (३.७६)
१०४४. ॐ नयनाम्बुजे कामदुहे नमः । (३.७७)
१०४५. ॐ हृदयाम्बुजे किमपि कारुणिकाय नमः । (३.७७)
१०४६. ॐ चरणाम्बुजे मुनिकुलैकधनाय नमः । (३.७७)
१०४७. ॐ वदनाम्बुजे व्रजवधूविभवाय नमः । (३.७७)
१०४८. ॐ रसान्तराणां निर्वासनाय नमः । (३.७८)
१०४९. ॐ अवतीर्णनिर्वाणसाम्राज्यमिव स्थिताय नमः । (३.७८)
१०५०. ॐ अव्याजमाधुर्यमहानिधानाय नमः । (३.७८)
१०५१. ॐ व्रजानां अधिदैवताय नमः । (३.७८)
१०५२. ॐ गोपीनां अभिमतगीतवेषहर्षात् आपीनस्तनभरनिर्भरोपगूढाय नमः । (३.७९)
१०५३. ॐ केलीनां रसैः उपास्यमानाय नमः । (३.७९)
१०५४. ॐ कालिन्दीपुलिनचराय नमः । (३.७९)

१०५५. ॐ खेचराङ्गनामाननीयमृदुवेणुनिस्वनाय नमः । (३.८०)
१०५६. ॐ कानने कृतास्पदाय नमः । (३.८०)
१०५७. ॐ कालमेघकलहोद्वहाय किमपि महसे नमः । (३.८०)
१०५८. ॐ अलसश्रोणीभरप्रौढिभिः वेणीभूतरसक्रमाभिः श्रेणीकृताभिः एणीशाबविलोचनाभिः अभितः वृताय नमः । (३.८१)
१०५९. ॐ रतिपतेः द्वौ पाणी च तूणीशयैः सायकैः विनोदयते नमः । (३.८१)
१०६०. ॐ वाणीनां परं अपदाय नमः । (३.८१)
१०६१. ॐ व्रजजनक्षोणीपतये नमः । (३.८१)
१०६२. ॐ कालिन्दीपुलिने यः वामे पाणितले मधुरं वेणुं कटिप्रान्ते विषाणं निधाय प्रतिकलं गाः च विलोकयन् तोयजपत्रपात्रनिहितं दध्यन्नमश्नाति तस्मै नमः । (३.८२)
१०६३. ॐ यत् गोपीवदनेन्दुमण्डनं कस्तूरिकापत्रकमभूत् तस्मै नमः । (३.८३)
१०६४. ॐ यत् लक्ष्मीकुचशातकुम्भकलशव्याकोचमिन्दीवरं तस्मै नमः । (३.८३)
१०६५. ॐ यत् निर्वाणनिधानसाधनविधौ योगिनां सिद्धाञ्जनं तस्मै नमः । (३.८३)
१०६६. ॐ श्यामलाय कृष्णाभिधानाय नमः । (३.८३)
१०६७. ॐ फुल्लेन्दीवरकान्ताय नमः । (३.८४)
१०६८. ॐ बर्हावतंसप्रियाय नमः । (३.८४)
१०६९. ॐ श्रीवत्साङ्काय नमः । (३.८४)
१०७०. ॐ उदारकौस्तुभधराय नमः । (३.८४)
१०७१. ॐ सुन्दराय नमः । (३.८४)
१०७२. ॐ गोपीनां नयनोत्पलार्चिततनवे नमः । (३.८४)
१०७३. ॐ गोगोपसङ्घावृताय नमः । (३.८४)
१०७४. ॐ कलवेणुनादरसिकाय नमः । (३.८४)
१०७५. ॐ दिव्याङ्गभूषाय नमः । (३.८४)
१०७६. ॐ यस्य नाभीसरसीरुहान्तरपुटे विधिः भृङ्गायमानः तस्मै नमः । (३.८५)
१०७७. ॐ यस्य वक्षः कमलाविहारभवनं तस्मै नमः । (३.८५)
१०७८. ॐ यस्य चक्षुषी इन्द्विनौ तस्मै नमः । (३.८५)
१०७९. ॐ यस्य पादाब्जविनिस्सृतं सुरनदी शम्भोः शिरोभूषणं तस्मै नमः । (३.८५)
१०८०. ॐ यस्य नामस्मरणं दुरितं धुनोति तस्मै नमः । (३.८५)
१०८१. ॐ घोषयोषित्कटाक्षाः यस्य पादमूले असितजलजैः अञ्जलिः नाभीसरसि मीनाः हृदये मारबाणाः कण्ठे हरिमणिमयाः हाराः वक्रपद्मे द्विरेफाः चिकुरनिचये पिञ्छाभूषाः भवन्ति तस्मै नमः । (३.८६)

१०८२. ॐ दधिमथननिनादैः प्रभाते निभृतपदं वल्लवीनां अगारं प्रविष्टः दीपान् मुखकमलसमीरैः आशु निर्वाप्य कबलितनवनीताय नमः । (३.८७)
१०८३. ॐ प्रातः दधिघोषविनीतनिद्राय नमः । (३.८८)
१०८४. ॐ निद्रावसानरमणीयमुखारविन्दाय नमः । (३.८८)
१०८५. ॐ हृद्यानवद्यवपुषे नमः । (३.८८)
१०८६. ॐ उन्निद्रपद्मनयनाय नमः । (३.८८)
१०८७. ॐ नवनीतचोराय नमः । (३.८८)
१०८८. ॐ फुल्लहल्लकवतंसकोल्लसद्वल्लाय नमः । (३.८९)
१०८९. ॐ आगमगवीगवेषिताय नमः । (३.८९)
१०९०. ॐ वल्लवीचिकुरवासिताङ्गुलीपल्लवाय नमः । (३.८९)
१०९१. ॐ यस्य नवनीतचौर्यं स्तेयं हरति तस्मै नमः । (३.९०)
१०९२. ॐ यस्य जारत्वं गुरुतल्पापराधं हरति तस्मै नमः । (३.९०)
१०९३. ॐ यस्य दशाननहतिः हत्यां हरति तस्मै नमः । (३.९०)
१०९४. ॐ यस्य पूतनास्तनपयः मधुपानदोषं हरति तस्मै नमः । (३.९०)
१०९५. ॐ श्री रमापतये नमः । (३.९१)
१०९६. ॐ आकुञ्चितं जानु वामं करं च क्षितौ न्यस्य दक्षिणहस्तपद्मे नवनीतखण्डं आलोकयते बालाय नमः । (३.९२)
१०९७. ॐ जानुभ्यां पाणिभ्यामपि अभिधावते सुन्दरबालकाय नमः । (३.९३)
१०९८. ॐ सकुण्डलालकाय नमः । (३.९३)
१०९९. ॐ सीतापतये नमः । (३.९४)
११००. ॐ यस्य पाणौ मणिचारुवेणुं तस्मै नमः । (३.९४)
११०१. ॐ यस्योत्तमाङ्गे मायूरबर्हं तस्मै नमः । (३.९४)
११०२. ॐ क्षीराम्भोधेः पतये नमः । (३.९५)
११०३. ॐ गवां पालकाय नमः । (३.९५)
११०४. ॐ यस्य निर्यासं हृदयात् न शक्यं तस्मै नमः । (३.९६)
११०५. ॐ तमसि उद्यन् रविरिव भासते नमः । (३.९७)
११०६. ॐ अम्बुराशौ मज्जतां प्लव इव यो विद्यते तस्मै नमः । (३.९७)
११०७. ॐ तृषितानां स्वादुवर्षी मेघ इव योऽस्ति तस्मै नमः । (३.९७)
११०८. ॐ विधनानां निधि इव योऽस्ति तस्मै नमः । (३.९७)
११०९. ॐ दीर्घतीव्रामयानां भिषक् इव योऽस्ति तस्मै नमः । (३.९७)
१११०. ॐ मसृणं कोदण्डं सुगन्धि विशिखं चक्राब्जपाशाङ्कुशं हैमीं वेणुलतां करैः च दधानाय नमः । (३.९८)

१११११. ॐ सिन्दूरपुञ्जारुणाय नमः । (३.९८)
१११२. ॐ कन्दर्पाधिकसुन्दराय नमः । (३.९८)
१११३. ॐ स्मितमुखाय नमः । (३.९८)
१११४. ॐ गोपाङ्गनावेष्टिताय नमः । (३.९८)
१११५. ॐ वरदाय नमः । (३.९८)
१११६. ॐ त्रैलोक्यरक्षामणये नमः । (३.९८)
१११७. ॐ गोपालाय नमः । (३.९८)
१११८. ॐ त्रैलोक्याकर्षणाङ्गाय नमः । (३.९९)
१११९. ॐ सुरनरगणिकामोहनापाङ्गमूर्तये नमः । (३.९९)
११२०. ॐ नवरसभरितैः शृङ्गारभावैः सेव्याय नमः । (३.९९)
११२१. ॐ गोपकन्यासहस्त्रैः रासकेलीरताय नमः । (३.९९)
११२२. ॐ अतिसुभगाय नमः । (३.९९)
११२३. ॐ वश्यगोपालकृष्णाय नमः । (३.९९)
११२४. ॐ कदम्बमूले पद्मासनस्थिताय नमः । (३.१००)
११२५. ॐ वेणुं गायते क्रीडते अच्युताय नमः । (३.१००)
११२६. ॐ नीलाम्बुदाभाय नमः । (३.१०१)
११२७. ॐ नवमणिविलसत्किङ्किणीजालबद्धश्रोणीजङ्घान्तयुग्माय नमः । (३.१०१)
११२८. ॐ विपुलरुरुनखप्रोल्लसत्कण्ठभूषाय नमः । (३.१०१)
११२९. ॐ फुल्लाम्भोजाभवक्त्राय नमः । (३.१०१)
११३०. ॐ हतशकटमरुत्पूतनाद्याय नमः । (३.१०१)
११३१. ॐ वन्दितेन्द्राद्यमरवराय नमः । (३.१०१)
११३२. ॐ अजाय प्रसन्नाय नमः । (३.१०१)
११३३. ॐ विकसितकुरुविन्दाभाय नमः । (३.१०२)
११३४. ॐ इन्दीवराक्षाय नमः । (३.१०२)
११३५. ॐ गोगोपीवृन्दवीताय नमः । (३.१०२)
११३६. ॐ जितरिपुनिवहाय नमः । (३.१०२)
११३७. ॐ कुन्दमन्दारहासाय नमः । (३.१०२)
११३८. ॐ नीलग्रीवाग्र्यपिञ्छाकलनसुविलसत्कुन्तलाय नमः । (३.१०२)
११३९. ॐ भानुमते नमः । (३.१०२)
११४०. ॐ पीताम्बराढ्याय नमः । (३.१०२)
११४१. ॐ देवैः वन्द्याय नमः । (३.१०२)
११४२. ॐ चक्रान्तध्वस्तवैरिव्रजाय नमः । (३.१०३)

११४३. ॐ अपास्तावनीभाराय नमः । (३.१०३)
११४४. ॐ नारदाद्यैः मुनिभिरावीताय तत्त्वनिर्णीतिहेतोः अभिनुताय नमः । (३.१०३)
११४५. ॐ निर्मलाङ्गाय नमः । (३.१०३)
११४६. ॐ निरुपमरुचिराय नमः । (३.१०३)
११४७. ॐ नीलभासाय नमः । (३.१०३)
११४८. ॐ विश्वोदयस्थित्यपहरणपराय नमः । (३.१०३)
११४९. ॐ मुक्तिदाय नमः । (३.१०३)
११५०. ॐ वासुदेवाय नमः । (३.१०३)
११५१. ॐ ऐक्षवं कोदण्डं अखण्डं पौष्पं इषुं च चक्राब्जपाशसृणिकाञ्चनवंशनालं अष्टविधबाहुभिः बिभ्राणाय नमः । (३.१०४)
११५२. ॐ अर्कवर्णाय नमः । (३.१०४)
११५३. ॐ मदनगोपविलासवेषाय नमः । (३.१०४)
११५४. ॐ विदुरार्पिते, कुन्त्यर्पिते, गोवर्धनमूर्ध्नि, पृथुके, यशोदार्पिते स्तन्ये, भारद्वाजसमर्पिते, शबरिकादत्ते, योषितां अधरे, मुनिपत्निभक्तिरचिते या प्रीतिः अत्रापि तां तां कुरु इति प्रार्थ्य एतत् नामावली श्रिकृष्णपादाम्बुजे समर्पिता । (३.१०५)

इति श्रीकृष्णकर्णामृतनामावलिः सम्पूर्णा ।

श्रीकृष्णार्पणमस्तु ।
सर्वापराधानि क्षम्यतां ।
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेर्स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

नमः शिवाय साम्बाय हरये परमात्मने ।
प्रणतक्लेशनाशाय योगिनां पतये नमः ॥

लोकाः समस्ताः सुखिनो भवन्तु ।

श्रीकृष्णकृपया नामसमाहरणं - मठत्तिल् नरेन्द्रन्

कृतज्ञता - श्री मोहन् चेट्टूर्

Compiled by: Madathil Narendran,
"Nama Sivaya", Near Siva Temple,
Kallekulangara, Palakkad-678009, Kerala, India
email: madathilnarendran at gmail.com.

Phone (0091) 9495035516॥

Encoded and proofread by Madathil Narendran

*Shrikrishnakarnamrita Namavalih*

pdf was typeset on April 5, 2025

Please send corrections to *sanskrit@cheerful.com*